CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. D. P. B.
Coll. No. 193

Title Śārṅgadharapaddhati

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 193 Subject: Kāvya-Poetry

Title: 'Śārṅgadhara Paddhati'.

Author: 'Śārṅgadhara Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11' 3'' x 5'' Extent: 79 Foly

Language: Sanskrit Script: Devanāgarī

Remarks: Incomplete ends abruptly

।यो।विध्यासना।।नवंकुन्ने ... जनप ...

णि श्रान्ते।।१।। कस्या ... ।।वा शः अस्त्वारथिकं धरीनर ... तोः प्रोतोरथः क्रामुकेमा वधे चिपतत्रनद्वाणर तो वक्रेरवा ... ग ...

देवकुं रतीप्रान्ते देवतथापिजिन्नात्रि विरुद्धर्यं नमो ... नूनो।।१।। कस्यापि।।रथः श्लोणी यैताधान ध्वतिरगें द्रो धनुरथोरथोंगचेद्रा ...

तोद्धिपद्मोक्तेको यैत्रिपुरस्त्वएमाज ... रविधि।। वेंधियैः कोऽदं योनरवज्जपरतंत्राः प्रत्युधियः।।१।। कस्यापि।।वक्राणि पैवक्रतयो ... दितानि ...

... गाननसमागमनक्रमेण।नूपो।पिशिलपरिहितत्रिलयेनगाढमालिंगितो।गिरिजयागिरिशः पुनातु।।१।। कस्यापि।।कासारतीरसरसी।।कमना ...

... नः ... प्रम ... भ्रमरमध्यामिवेंदुबिंबं।।देमाम्बरशिरितरंजवतः सपापासंजातनिर्मलजलप्रतिबद्धनमा।।१।। वात्वधाउद्धलोचनंपरवधूवं ...

... त्रिवैदने ... नैसाधुजनापवादगहनेवास्मात्तिरायासितं।नथ्यानो।स्मिनक्रीत्रितोऽस्मिनमनागृष्टेऽस्मिनेवक्षतः किंब्रूमोजगदीश्वरं ...

... हारो।पिलज्जामहे।।१।।

... अ ... रस ...

अद्दमाउनारायणस्य पुस्तक।।

ॐ नारायणायनमः।।

शार्ङ्गधरसाहित्युत· ५१० अं ५५

५४

थम

॥ॐ नमः श्रीगणेशाय॥ यस्मिन्बुद्बुदसंकराइव बहूब्रह्मांडखंडाः क्वचिज्जातिक्वापि च सीकरा
इव विरिंच्याद्याः स्फुरंति भ्रमात्॥ चिद्रूपा लहरीव विश्वजननी शक्तिः क्वचिद्द्योतते स्वानंदामृत
निर्भरं शिवमहापाथोनिधिं तं नुमः॥१॥ पुरा शाकंभरीदेशे श्रीमान्हम्मीरभूपतिः। चाहुवाण
चये जातः ख्यातः शौर्य इवार्जुनः॥२॥ तस्यास्त वसभ्यजनेषु मुख्यः परोपकारव्यसनैकनिष्ठः। पु
रंदरस्येव गुरुर्गरीयान्द्विजाग्रणी राघवदेवनामा॥३॥ गोपालदामोदरदेवदाससंज्ञास्त्रयस्तु
स्तनयास्तदीयाः। नेत्रावताराइव चंद्रमौलेरपास्ततंद्रा तद्गुणास्त्रयोपि॥४॥ तेषां मध्येयस्तु दामो
दरो भूद्भुत्वा यश्रीनात्मजा वीतरागः। भागीरथ्यां शुद्धदेहं विधाय ज्ञानादात्मन्येव निष्ठां जगाम॥
५॥ ज्येष्ठः शार्ङ्गधरस्तेषां लघुर्लक्ष्मीधरस्ततः। कृष्णोनुजस्ततस्तेपि त्रयस्त्रेताग्नितेजसः॥६॥ ज
यति शार्ङ्गधरस्त्रिपुरापदद्वयकुशेशयकोशमधुव्रतः। सरसमस्तसूक्तिसुधोदयकलानिधिः कवि

करींद्रकदंबमृगाधिपः॥७॥ यद्यपि गुणौघनिलयः खलशैलध्वंसनो जिष्णुः। तदपि विमलहृदयांतरस
ज्जनलोकस्य दासोसौ॥८॥ ते सज्जनाः सुकविशाखिकविचित्रपुष्पाण्यादाय गुंफितवतः स्वगुणैर्ममैतत्।
संधारयंति कुसुमोज्ज्वलहाररूपं कंठे सुभाषितमपास्तसमस्तदोषं॥९॥ न शार्ङ्गधरपद्धतिः खलजन
स्य योग्या भवेत्सुभाषितरसोर्मयः स्फुरति लोकपेयायतः। सुधामदितिनंदनादिविपिबंति हृष्टांतरां तथैव
तमसः शिरो रुटिति खंडितं श्रूयते॥१०॥ आनंदाय सतां भूयात्सुभाषितमिदं मम। पृथक्पद्धतिसंमिश्रपरिच्छे
दैर्मनोरमं॥११॥ आद्यैर्मद्विहितैः पद्यैः क्रियद्भिरपरैरपि। युता पद्धतिरेषास्तु सज्जनानंददायिनी॥१२॥ इति
श्रीदामोदरसूनुः शार्ङ्गधरविरचितायां पद्धत्यां कविवंशवर्णनापरिच्छेदः॥१॥ ॥अथानुक्रमणिका॥ क्रिय प्रथम
तेनुक्रमः स्पष्टः सुबोधार्थं सुभाषिते। अत्र तु प्रथमं ज्ञेयं कविवंशस्य वर्णनं॥१॥ ततोप्यनुक्रमो ज्ञेयो नम
स्कृत्या शिवे तथा। सुभाषिते च काव्ये च शंसा सामान्यवर्णकौ॥२॥ विशिष्टकविशंसा च निंदा च कुकवेस्तत॥
प्रशंसा पंडितस्यापि निंदा स्यान्मूर्खपंडिते॥३॥ प्रशंसा महतां ज्ञेया धीराणां च प्रशंसनं। प्रशंसा सज्जन

स्याय प्रशंसा च मनस्विनः ॥४॥ अथोदारप्रशंसास्यात्संसा तेजस्विनस्ततः। गुणप्रशंसा संतोषप्रशंसा संगतो तथा ॥५॥
धनप्रशंसा विज्ञेया निंदा दुर्जनजा तथा। ततः कृपणनिंदास्यान्निंदा याचकजा तथा ॥६॥ दरिद्रनिंदा विज्ञेया मूर्खनिंदा
ततः परं। दृष्टानिंदा लोभनिंदा दैवाख्यानं ततः परं ॥७॥ उद्यमाख्यानमपरं प्रकीर्णाख्यानकं तथा। समस्याख्यान
मपरं प्रहेल्यादिप्रशंसनं ॥८॥ क्रियागुप्तादिकं तद्वत्प्रश्नोत्तरमतः परं। अथ जातिसमाख्याता सदाचारस्ततः प
रं ॥९॥ धर्मस्य विवृतिर्ज्ञेया पापस्य विवृतिस्तथा। अथान्योक्तिषु विज्ञेयं रवेः पूर्वप्रशंसनं ॥१०॥ चंद्रस्यान्योक्तयो
ज्ञेया मेघस्यान्योक्तयस्तथा। वायोरन्योक्तिरपरा हंसान्योक्तिस्ततः स्मृताः ॥११॥ भ्रमरान्योक्तयस्तद्वत्कोकिलान्यो
क्तयस्तथा। चातकान्योक्तयस्तद्वन्मयूरान्योक्तयस्तथा ॥१२॥ सिंहान्योक्तिर्गजान्योक्तिर्मृगान्योक्तिस्ततः परं। कर
भान्योक्तयो ज्ञेया वृषभान्योक्तयस्ततः ॥१३॥ शुकान्योक्तिस्ततो ज्ञेया काकान्योक्तिस्ततः परं। बकान्योक्तिः स्मृता त २
द्वत्खद्योतान्योक्तयस्ततः ॥१४॥ तथा सामान्यवृक्षोक्तिर्विशिष्टतरुपद्धतिः। पर्वतान्योक्तयः ख्याता अगस्त्यान्यो
क्तयस्ततः ॥१५॥ समुद्रान्योक्तयस्तद्वद्वनान्योक्तिस्ततः परं। शंखस्यान्योक्तयस्तद्वन्नद्यन्योक्तिस्ततः परं ॥१६॥ नरा

कान्योक्तयस्तद्वत्कमलान्योक्तयस्ततः। कूपस्यान्योक्तयस्तद्वन्मरुस्थलभवोक्तयः ॥१७॥ ततो दावानलान्योक्तिः सं
कीर्णान्योक्तयस्ततः। अथ सर्वनृपाशंसा विशिष्टनृपवर्णना ॥१८॥ पलायनमरीणां च राजनीतिस्ततः परं। नीति
मिश्रकनीतिश्च प्रशंसाकरिणां तथा ॥१९॥ अश्वप्रशंसा विख्याता धनुर्वेदस्ततः परं। गांधर्वशास्त्रमपरं त्वा
युर्वेद एव च ॥२०॥ तथैव शकुनज्ञानं प्रश्नो लक्षणानि च। विषापहरणं तद्वद्भूतविद्या ततः परं ॥२१॥ बालग्र
होपशमनं कौतुकानि ततः परं। कल्पस्थानानि केशानां रंजनानि ततः परं ॥२२॥ अथ सामान्यशृंगारे युवती
नां प्रशंसनं। स्त्रीपुंसोः प्रीतिकथनं तयोः संयोगवर्णनं ॥२३॥ स्त्रीसेवाकथनं तद्वत्संकेतादिप्रशंसनं। बालायाव
र्णनं तद्वद्वयःसंधेश्च वर्णनं ॥२४॥ तरुणीवर्णनं तद्वत्समग्रस्त्रीप्रशंसनं। विप्रलंभकशृंगारे प्रियप्रस्थानवर्णनं
॥२५॥ नायिकावर्णनं तद्वद्वियुक्तावस्थितिस्तथा। सखीवाक्यं वियुक्तायां वियोगिन्याः प्रभाषणं ॥२६॥ दूतिकाप्रेषणं
कांते प्रलापाश्च वियोगिनः। दूतोक्तिर्नायकस्याग्रे नायिकायां नतूक्तयः ॥२७॥ उपहासादिकं दूत्यां नायिकाया
स्ततः परं। अथ संयोगशृंगारे परस्परविलोकनं ॥२८॥ प्रियातिथ्यादिकं तद्वन्मानिनीमानवर्णनं। कलहोक्त्यादिक

थनं मिथुनस्योक्तयस्तथा॥२८॥ प्रियस्य शिक्षा त्वनयः प्रसादश्च परस्परं। सूर्यास्तं च कदुःखं च तमसो वर्णनं
तथा॥३०॥ सेवा रस्सानि सारीणां शशांकोदयवर्णनं। पानगोष्ठी ततः प्रोक्ता चाटुप्रभृति वर्णनं॥३१॥ सखीवाक्यं नवव
धूक्रीडायां तदनंतरं। सुरतं क्रीडितारव्यानं विपरीतरतं तथा॥३२॥ निवृत्तिः सुरतस्याथ निशीथक्रीडनादिकं। प्रभाते
वर्णनेवास्तु सूर्ययोर्वर्णनं ततः॥३३॥ रात्रिसंभोगचेष्टायाः प्रातःप्र(ख्या)नंतरं। अथ मिश्रकशृंगारे सतीकुलवधूस्थितिः
॥३४॥ असतीचरितं तद्वद्वसंतादेश्च वर्णनं। ग्रीष्मादेर्वर्णनं तद्वद्वर्षादेरपि वर्णनं॥३५॥ शरस्वनावाब्बारव्यानं हेमंता
देश्च वर्णनं। शिशिरादेस्तथारव्यानं संमिश्रारव्यानकं ततः॥३६॥ ततो वीररसोक्तिः स्यात्करुणारसवर्णनं। अद्भुतस्य र
सस्योक्तिरथ हास्यरसोक्तयः॥३७॥ भयानकश्च बीभत्सस्ततो रौद्ररसोक्तयः। अथ शांतरसे सर्ववैराग्यस्य प्रशंसनं॥३८॥
अनित्यता संसारख्यानं विषयादिविडंबनं। पश्चात्तापस्य कथनं कालस्य चरितं तथा॥३९॥ ततो विवेककथनं सुपदेशास्ततः परं। ३
कालसंख्या ततः प्रोक्ता शारीरं तदनंतरं॥४०॥ ततश्चतुर्विधे योगे योगत्रयनिरूपणं। ततस्तु हठयोगः स्याद्गोरक्षादिसाधितः॥४१॥
द्वितीयो हठयोगस्य मार्कंडेयादिसाधितः। मनःस्थैर्यप्रभावश्च महिमाद्याश्च योगिनः॥४२॥ योगिचर्या ततः प्रोक्ता ज्ञानं वाग्रिष्ठजं
तथा। विदेहमुक्तिकथनं कालवंचनसंयुतं॥४३॥ सुभाषितवरस्येति कथितोयमनुक्रमः। शतैस्त्रिषष्ट्यधिकैः परिच्छेदेषु कीर्तितः॥४४॥

गणितं पद्यसंख्याभिः षट्सहस्रं शताष्टकं॥४५॥ इति श्रीदामोदरसूनोः शार्ङ्गधरविरचितायां पद्धत्यां अनुक्रमपरिच्छेदः॥१॥ ॥ द्वि
अथ नमस्कृतिः॥ वल्गत्कर्णानिलोद्धूतसिंदूरारुणितांबरः। जयत्यकालेपि सृजन्संध्यामिव गजाननः॥१॥ कस्यापि। उच्चैर्ब्र
ह्मांडखंडद्वितयसहचरं कुंभयुग्मं दधानः प्रेंखन्नागारिपक्षप्रतिचटविकटश्रोत्रतालाभिरामः। देवः शंभोरपत्यं भुजगप
तितनुस्पर्द्धिवर्द्धिष्णुहस्तस्त्रैलोक्याश्चर्यमूर्तिः स जयति जगतामीश्वरः कुंजरास्यः॥२॥ नेरीनांकारस्य॥ इति गणेशः॥ अथ सरस्व
ती॥ करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः। पश्यंति सूक्ष्ममतयः सा जयति सरस्वती देवी॥३॥ सुबंधोः॥ इति स
रस्वती॥ अथ शिवः॥ नमस्तुंगशिरश्चुंबिचंद्रचामरचारवे। त्रैलोक्यनगरारंभमूलस्तंभाय शंभवे॥४॥ बाणभट्टस्य॥ मौनाद्रस्त
मितेव वाग्भणितिश्चास्ते कहस्ताक्षतां हरेप्यंजलिबंधने प्रणमनं स्तुत्वा ईषद्धर्ध्वः कृतः। द्वंद्वं संघटितेकविग्रहतया व्य
ग्रो गिरिग्रामणीजायां जातरूपं जयत्यनुनयन्देवस्त्रिलोकीगुरुः॥५॥ कस्यापि॥ वामांगीकृतवामांगि कुंडलीकृतकुं
डलि। आविरस्तु पुरो वस्तु रतिभूत्यं वरं वरं॥६॥ सार्वभौमस्य॥ पिनाकफणिबालेंदुभस्ममंदाकिनीयुता। तथा पिन
वर्णमूर्तिरपवर्गानुसारिणी॥७॥ देवेश्वरस्य॥ उदरदयनरणनयादर्धांगाहितदारः। यदि नेनंतस्यैकसुतः कथमद्यापि कु
मारः॥८॥ सार्वभौमस्य॥ संध्याननेनरपुंवश्चिनितेंसरोषभुग्नारितो गिरिजया निजपाणिपद्मे। उत्सर्पिकंकणफणींद्र

फणार्पणेन हरमौलि लिर्जयति बालमृगांकमौलेः॥९॥कस्यापि॥ उत्थैरुत्तालखेलद्भुजपवनवनोद्भूतशैलोग्रपानस्फारो
दंचत्पयोधिप्रकटितमुकुटस्वर्धुनीसंगमानि। जीयासुस्तांडवानि स्फुटविकटजटाकोटिसंघट्टभूरि त्रस्यन्नस्तत्र
क्रव्यवसितसुमनोदृष्टिपातानि शंभोः॥१०॥ त्तनेरीनांकारस्य॥ मंदारमालाकुलितालकायै कपालमालांकितशेखराय।
दिव्यांबरायै च दिगंबराय नमः शिवायै च नमः शिवाय॥११॥कस्यापि॥ इति शिवः॥ अथ गौरी॥ हरकंठग्रहानंदमीलिताक्षी
नमाम्युमां। कालकूटविषस्पर्शजातमूर्छागमामिव॥१२॥ बाणभट्टस्य॥ इति गौरी॥ ॥ अथ लक्ष्मः॥ मेघैर्मेदुरमंब
रं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय। इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुं
जद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः॥१३॥ जयदेवस्य॥ आनंदध्वंतमायतलोचनानामानी
लमावलितकंधरमात्तवंशो आपादमामुकुटमाकलिताप्तौघमाकारमाकलयतां मम मुग्धतरंगैः॥१४॥ पिंडी
भूतं प्रेम गोपांगनानां मूर्तीभूतं भागधेयं यदूनां। एकीभूतं गुप्तवित्तं श्रुतीनां श्यामीभूतं ब्रह्म मे संनिधत्तां॥१५॥
एतौ राघवचैतन्यश्रीचरणानां। परमिममुपदेशमादरध्वं निगमवने सुनितांतखेदखिन्नाः। वितनुत भवने
वल्लवीनामुपनिषदर्थमुलूखले निबद्धं॥१६॥ नवनीलमेघरुचिरः परःप्रमान वनीमवाप्य धृतगोपविग्रहः॥

नवनीयकीर्त्तिरमरैरपि स्वयं नवनीतनिस्तुरघुनासचिंत्यते॥१७॥ एतौ बिल्वमंगलश्रीचरणानां। कयासिख
लु चोरिके प्रमुखितं स्फुटं इदमपनेद्वितीयमिह मामिकं वह सि कंडुकं कंचुकोत्पजेति नवगोपिकाऊच मुग्धं नि
मध्यन्बलात्तसत्कुलकपंजरो जयति गोकुले केशवः॥१८॥ दीपकस्य॥ हृक्याकर्मणासने स्तु नवतु ज्ञानं मना
गमारुते श्रीकंठेयमितः सुरानिति ननांस्तार्सेण विज्ञापितः। प्रेयस्याः कृतहासनं कन्वरुतं कंठः कवे लुस्तसद्य
ष्या वासितमानसो विजयते सुप्तप्रबुद्धो हरिः॥१९॥ कस्यापि॥ अति विपुलेन चषुगलं रहसि करे राष्ट्रान्मुकु
लिताः तदपहृतं निजहृदयं जयति हरिर्मृगयमाणः॥२०॥ अरसीठकुरस्य॥ मकरीविरचनभंग्या राधाकुचकल
शपीडनव्यसनी। रजुमपि रेखां लुंपन्वद्धचवेषो हरिर्जयति॥२१॥ हरिहरस्य॥ खिन्नो विमुंच शैलं बिभ्रमो वयमिति
वदत्सु शिथिलभुजः। भरभुग्नविततबाहुषु गोपेषु हसन्हरिर्जयति॥२२॥ सुबंधोः॥ शिरश्छायां कृत्स्नः क्षणमलत
राधाचरणयोर्भुजावल्लीछायामियमपित दीयप्रतिमितो। धृतिक्रीडाकोपे निभृतमुनयोरप्यनुनयप्रसादो जी
यास्तामपि गुरुसमक्षीस्थितवतोः॥२३॥ कस्यापि॥ वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं
छलयते क्षत्रक्षयं कुर्वते पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं

फ्रगा नमः॥२४॥ जयदेवस्य॥ जीयासुः शार्ङ्गलाञ्छनस्य भगवतश्छच्छटा कौस्तुभोद्यन्नःशतवंदितांबरतलं ते बिंदवः सैंधवाः
ये व्यालत्पपतद्भिरौर्वशिखिनस्तेजोजटालं वपुः पानाश्मानवशादरोचकरुजां चक्रे विरस्यास्पदं॥२५॥ वियस्थु दितयार
छोछालोछलितं जलगर्त्तनिधिरपामपांनाथः पाथः पृषतलवगतो विषदन्तूनं अन्तूडास्थानौ वोदिनपतिर
तू दौर्वदहनश्चलक्कायेयस्मिन्स जयति हरिमीनवपुषा॥२६॥ कस्यापृष्ठेतो नपंकेरालेपंकलयतिधरित्री व्यपनया
न्नमुस्तामविषमखुरगनगरभ्रंशशंकितः। नधत्ते ब्रह्मांडस्फुटनभयतो घुर्घुररवं वराहो माहात्म्यादिति जयति
संकोचिततनुः॥२७॥ हनूमतः॥ दैत्यानामधिपे नखांकुरकुटीकोणप्रविष्टात्मनि स्फारीभूतकठारकेसरसटासं
घातघोराकृतेः। सक्रोधं च सविस्मयं च सगुरुव्रीडं च सांतः स्मितं क्रीडाकेसरिणो हरेर्विजयते तत्कालमालो
कितं॥२८॥ इंदुकवेः॥ इति नृसिंहः॥ अथ ब्रह्मा॥ तं वंदे पद्मसद्मानमुपवीतच्छटाछलात् गंगास्रोतस्त्रयेणेव यस्य
देवनिषेवितो॥२९॥ राजशेखरस्य॥ इति ब्रह्मा॥ अथ रविः॥ शुकतुंडच्छविः सवितुश्चंडरुचेः पुंडरीकवनबंधोः मंडल ५
मुदितं वंदे कुंडलमाखंडलाशायाः॥३०॥ नागम्मायाः॥ इति श्रीशार्ङ्गधरविरचितायां पद्धत्यां नमस्कृतिपरिच्छेदः॥ द्वितीयः॥ अ
॥ ॥३१॥ अथाशिषः॥ तत्र प्रथमं गणेशः॥ दंताग्रनिर्भिन्नहिमाद्रजोवीरंध्रोच्छितां हीद्रमणिप्ररोहैः॥ नागाननः स्व

नप्रियायाः कपोलौ घर्षन्निव स्वां हसितः पुनातु॥१॥ श्रीगोविंदराजदेवानां॥ एकरदं तद्युतिसितः शोणः स्कंदः श्रियेस्तु
व गविद्याकंदरस्योद्भिन्नलवोऽकरमनोहरः॥२॥ श्रीधनददेवानां॥ गंडस्थलीगलदमंदजलप्रवाहमाद्यद्द्विरेफमधु
रस्वरदत्तकर्णः॥ हर्षादिवालसनिमीलितनेत्रयुग्मो विघ्नच्छिदेस्तु भवतां भूतपतिर्गणेशः॥३॥ श्रीनगरप्राकारप्र कार
शस्तेः॥ विघ्नेशो वः सपायाद्विहृतिषु जलधीन्पुष्कराग्रेण पीत्वा यस्मिन्नुद्धृत्य विश्वं वमति तदखिलं दृश्यते व्योम्नि हर्षे
देवैः क्वाप्यंभः क्वापि विष्णुः क्वचन कमलभूः क्वाप्यनंतः क्वचिच्छ्रीः क्वाप्यौर्वः क्वापि शैलाः क्वचन मणिगणाः क्वा
पि नक्रादिसत्वाः॥४॥ हनूमतः॥ सानंदं नंदिहस्ताहतमुरजरवाहूतकौमारबर्हित्रासान्नासाग्ररंध्रं विशति फ
=वधिरित णिपतौ भोगसंकोचभाजि। गंडोड्डीनालिमालामुखरितककुभस्तांडवे शूलपाणेर्वैनायक्यश्चिरं वो वदन
विधुतयः पांतु चीत्कारवत्यः॥५॥ भवभूतेः॥ इति गणेशः॥ ॥अथ शिवः॥ उपग्रहणं विनवानां संहरणं सकलदु दूरं
रितजालस्य। उद्धरणं संसाराच्छंभोश्चरणं वः श्रेयसेस्तु विश्वपतेः॥६॥ विद्याकरस्य श्रीचरणानां॥ आसीनेष्टमितस्ते
व्यसनि निशाशिनि योग्निरूलसत्प्ले देव्ये इजात निद्रद्वतिमघवतिक्रांतकोनो कृतांते। अब्रह्मण्यं ब्रुवाणो
कमलभुट्ठकुटीश्रोत्रियत्रातुपाये पायाद्वः कालकूटं कटिति कवलयं लीलया नीलकंठः॥७॥ लक्ष्मणदंडप्रशस्तेः

वक्त्रं शीतकरैर्यरोधन रसः कामप्रदो विग्रहः श्वासो गंधवहः सरोरुहसुहृत्पाणिस्मिता नाभ्रुवि। वक्त्रः पीवरप
योधराधिकरणं पृथ्वीनितंबस्थलीत्यष्टोष्ठूर्जटि मूर्त्तयः स्मरनयाद् गौर्याश्रिताः पांतु वः॥ नादेवेश्वरस्य।। केयं मौ
लौ जटाली कथमनुदितज्वालानालवह्निः प्रकाशात्सक्लिन्ना स्वेदवारिस्फुलिंगमृतततः केयमन्याशवक्रा। रो
षाद्रा वंदनस्य प्रकटनं रमयाई त्वमस्याः कथं स्याडुक्तिप्रत्युक्तिरव्याद् घुनदिशशिकला गोपने देवदेव्योः॥९
एम दे वपंडितस्य॥ कस्त्वं शूली मृगय भिषजं नीलकंठः प्रिये हं केकामेकां कुरु पशुपतिर्नैव दृष्टे विषाणे॥ स्था
णुर्मुग्धे न वदति तरुर्जीवितेशः शिवाया गच्छाटव्यामिति हतवचाः पातु वश्चंद्रचूडः॥१०॥ नारती कवेः॥ च्युताम्
दोर्लेखां रतिकलहहृन्नयं च वलयं समं चक्रीकृत्य प्रहसित मुखी शैलतनया॥ अवोचद्यं पश्येत्यवतु स शिवः
सा च गिरिजा स च क्रीडा चंद्रो दशनकिरणापूरिततनुः॥११॥ क्रीडाचंद्रस्य॥ कल्पांत क्रोधनस्य त्रिपुरविजयि
नः क्रीडयासं चरिष्णोः स्याचापि प्राणिजातैर्निजमुखकुहरानिष्प्रमप्राप्त दृष्टैर्दिग्भित्तीः प्रेक्ष्य शून्याः प्रलय
जलनिधि प्रेक्षितानीयमूर्त्तिर्ग्रासव्यासक्तिमोघश्रमजलितरुषः पांतु वो गर्जितानि॥१२॥ नेरी भांकारस्य॥ कल्पां
तेशमित त्रिविक्रममहाकंकालबद्धस्फुरच्छेष स्यूतनृसिंहपाणिनखरप्रोता दि कोलामिषः॥ विश्वैकार्णवतामि

नि २

नू १

रोषमुदितौ तौ मस्य कूर्मो वृतौ नौकर्षद्धीरवतां गतः स्यत्तु सतां मोहं महाभैरवः॥१३॥ छिन्नमस्य॥ इति शिका॥ अ
थ लोचनं॥ पद्मालीपिंगलिम्नः कणदवत डितां यस्य कल्पः स पृहो यस्मिन्ब्रह्मांडमीषद्विघटित मुकुले कालं
यक्ता ऊहावा अर्विर्निक्षिप्त चूडा शशिगलितसुधाधारकृकारिकोणं तार्त्तीयीकं पुरारेस्तदवतु मदनप्लोष
नं लोचनं वः॥१४॥ श्रीज्ञवचूतेः॥ अथ गणाः॥ संध्या तांडव डंबरव्यसनिनो देवस्य चंडीपतेर्भ्रष्टा पीडकपाल
दाम घटना व्यग्रा गणाः पांतु वः॥ ये रोमुक्य वशीकृतैर्ग्रहगणाद्वाहो गृहीतेजवा सूर्याचंद्रमसो मिथः स्मि
तवतो र्जातं करास्फालनं॥१४॥ कस्यापि॥ इति गणाः॥ सिंदूरीयति कुंकुमीयति जपापुष्पीयति प्रस्फुरद्धूक
स्तवकीयति प्रविकसत्संध्याभ्रु रागीयति॥ तार्त्तीयं त्रिपुरांतकस्य नयनं त्यक्तो स्मनावानलं यज्ञौरीसुरतेस्म
रोद्भवकरं तत्पातु मई जगत्॥१५॥ एम देवपंडितस्य॥ ॥ अथ जटाजूटः॥ स धूर्जटिजटाजूटो जायतां विजया
य वः॥ यस्यैकपलितभ्रांतिं करोत्यद्यापि जाह्नवी॥१६॥ स्वरवर्मणः॥ अथ पार्वती॥ प्रत्यासन्नविवाहमंगलविधौ दे
वार्चनव्यग्रया दृष्ट्वाग्रे परिणेतुरेव लिखितां गंगां च रस्याह्रुतिं॥ उन्मथ्य स्मितरोषलज्जिनधिया गौर्या कथं वि
चिराहृद्दृष्टीवरनात्मियेविनिहितः पुष्पांजलिः पातु वः॥१७॥ वक्त्रः पीठे निरीक्ष्य स्फटिकमणिशिलामंडलस्य

छलं दछक छकेहरे छातेतरी कुछरामूर्छनो हमरार्षि हर्षविहितस्नानाक्रिक्रा कायवशात्ति घाडघडुदार दुर्दरदरीदीर्घ दरिदङ्गुनद्रोहोड
मेमिधुरमहामंदाकिनीमंदतां॥१॥ कस्यापि॥३१०॥ अमरीकबरीभारभ्रमरीमुखरीकृतं। दूरीकरोतु दुरितं गौरीचरणपंकजं॥३२॥ कोपश्च॥

छनासिस्वांछायांसा न्यस्य्या वमियमिति मुऊः सत्पमाश्वासिता। पिवामेभेदक्षिणेस्याः श्रवसि कुवलयंनाद
= नार मित्यालपंतीदत्तश्लेषा सहासं मदनविजयिना पार्वती वः पुनातु॥३१७॥ कस्यापि॥ स्वेदस्तेकथमीदृशः प्रियतमेत्वं
नेत्रवह्नेर्विनोकस्मादेपितमेतदिंदुवदने त्रोगीद्र नीतेर्नवा रोमांचः कथमेषदेवि नगवान्गंगा नसांसीकरैरित्थंन
र्तरिन्नावगोपनपरा गौरीचिरं पातु वः॥१॥ कस्यापि॥ इति पार्वती॥ अथ षण्मुखः॥ अविश्लिष्टांतिविदार्य वक्त्रकुहरा
ण्यासृक्कितो वासुके रंगुल्या विषकर्बुरान् गणयतः संस्पृश्य दंतांकुरान्। एकंत्रीणि [illegible] वसप्तपंचषडिति प्रध्वस्त
संख्याक्रमा वाचः क्रौंचरिपोः शिशुत्वविकलाः श्रेयांसि पुष्णंतु वः॥१९॥ कस्यापि॥ इति षण्मुखः॥ अथ गंगा॥ मुक्ता
नाट्कपाल शुक्तिषु जटा वल्लीषु मल्लीनिभा [illegible] लाजनिभा दृशो र्मणिनिभा नागौत्करो नागिनो। नृत्या
वर्तविवर्तने रितपयः संमूर्छनो च्छालिताः खेलंतो हरिशीर्ष पांतु नवतो गंगापयो विंदवः॥२०॥ लक्ष्मिमिश्रस्य॥
एषा धर्मपताकिनी तट सुधा सेवावशं नाकिनी ष्पत्यात किनी नगरिस्थतपः साफल्य हेवाकिनी। प्रेमारूढपिनाकि
नी गिरिसुता साकेकरालोकिनी पापाडंबरडाकिनी त्रिभुवनानंदाय मंदाकिनी॥२१॥ कस्यापि॥ इति गंगा॥ अथ
तांडवं॥ देवाद्दिक्पतयः प्रयात परतः खं मुंचतांभोमुचः पातालं व्रज मेदिनि प्रविशत क्षोणीतलं भूधराः। ब्रह्मन्नुन्नय
= कयत्राणिक रोटयः कति कृति द्वीपि द्वीपानां वयः कति काकोलाः कति पन्नगाः कति सुधा खंडाः कति। देवि त्वं न कति त्रिलोकजननि त्वद्वाक्पूरे यतो म
= कुंजेंद्र दंवत्रं सकृदयच्ये कैकमादायनत्॥१॥ कस्यापि॥३२ को॰।

सं
दूरमात्मनवनंनाथस्यनोनृत्यतः शंभोः [illegible] कटमेतदित्यवतुवः प्रोत्सारणा नंदिनः॥२२॥ महानाटकात्॥ संध्यातां
डवडंबर व्यसनिनो भर्गस्य चंडभ्रमि व्यानृत्यद्भुजदंडमंडल भुवो झंझानिलाः पांतु वः। येषामुच्छलतां डवेन रूगिति
व्यूहेषु भूमीभृतां मुड्डीनेषु विडौजसा पुनरसौ दंभोलिरालोकितः॥२३॥ सोमनाथप्रशस्तेः॥ इति तांडवं॥ अथ हरिहरौ॥
स्फटिकमरकतश्रीहारिणोः प्रीतियोगात् तदवतु वपुरेकं कामकंसद्विषोर्वः। जवति गिरिसुतायाः सार्धमंभोधिपु
त्र्यांसदृशमहसि कंठे यत्र सीमाविवादः॥२४॥ कस्यापि॥ यो तौ शीर्षक कपालभूषितकरौ मालाक्षिमालाधरौ देवौ द्वा
रवति श्मशाननिलयौ नागारिगोवाहनौ। द्वित्र्यक्षौ बलिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ पापं वो हरतां सदा हरि
हरौ श्रीवत्सगंगाधरौ॥ कस्यापि॥ इति हरिहरौ॥ अथ चंडी॥ विघ्नाणेरुद्दंदेद सवितरि तरले वह्नि निर्भुग्नवंशे
तारांके शशांके विरमति मरुति त्यक्तवैरे कुबेरे वैकुंठे कुंठिताङ्गे महिषमतिरुषं पौरुषोपघ्ननिघ्नं निर्विघ्नं विघ्नती वः
शमयतु दुरितं भूरिभावा भवानी॥२५॥ बाणभट्टस्य॥ इति चंडी॥ अथ लक्ष्मीः॥ पांतु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः। = मानेजग
त्रैलोक्यमंडपस्तंभाश्चत्वारो हरिबाहवः॥२७॥ कस्यापि॥ आम्यन्मंदर कंदरोदर दरीव्यावृत्ति निर्वारितैः कल्लोलैरल
माकुलं कलयतो लक्ष्म्या मुखं जोरुहां। श्री सुक्तातरलाः स्मराद्धि कमिता नीत्वा सभा कुंचिताक्रोधेन द्रालिता मुदा

मुकुलितांशोरेष्टशः पांडवः॥२८ कस्यापि॥ अर्धोन्मीलितलोचनस्य पिबतः पर्याप्तमेकं स्तनं सद्यः प्रस्नुतदुग्धदिग्धमपरं
हस्तेन संमार्जतः। मात्रा चांगुलिलालितस्य चिबुके स्मेरायमाने मुखे विष्णोः क्षीरकणांबुधामधवला दंतद्युतिः पा
तु वः॥२९ बिल्वमंगलश्रीचरणानां॥ अस्मिन् कुंजे विनापि प्रचलितपवनाद्वृत्ते कोपि नूनं परयामः किंनु गवेत्यनुसरति
गणे नीतनीतेर्न काणोतस्मिन्मायास्य रवो वः सुखयतु विलसच्छीलया कैटभारेर्व्यक्तध्वानो मृगारिप्रबलघुरु
घुरारावरौद्रान्निदानात्॥३० कस्यापि॥ दर्पणार्पितमालोक्य मायास्त्रीरूपमात्मनः। आत्मन्येवानुरक्तो वः शिवं दि
शतु केशवः॥३१॥ कस्यापि॥ गच्छाम्याच्युत दर्शनेन न भवतः किं तु प्रियं कृत्यते किं त्वेवं विजनस्थयोर्हतजनः संभावय
त्यन्यथा। इत्यामंत्रणभंगिसूचितवृथावस्थानखेदालसामाश्लिष्यन्पुलकोत्कराचितवपुर्गोपीं हरिः पातु वः॥३२
कस्यापि॥ हृदयं कौस्तुभोद्भासि हरेः पुष्णातु वः श्रियं। राधाप्रवेशरोधाय दत्तमुद्रामिव श्रिया॥३३॥ कुमुदस्य॥ रामो ना ८
म बभूव हुं तदबला सीतेति हुं तां पितुर्वाचा पंचवटीवने विचरतस्तस्याहरद्रावणः। कृष्णेनेति पुरातनीं निजकथा
माकर्ण्य मात्रेरितां सौमित्रे क्व धनुर्धनुर्धनुरिति व्यग्रा गिरः पांडवः॥३४॥ वसुंधरस्य॥ सकलभुवनबंधो वैरिमिंदोः
सरोजे रचितमिति मिमिक्षायः स्वपादारविंदौ घटयितुमिव मायी योजयत्यानने दोर्वटदलपुटशायी मंगलं वः स दिष्टात्॥३५

कस्यापि॥ कोयं द्वारि हरिः प्रयाह्युपवने शाखामृगेणात्र किं कृष्णोहं दयिते बिभेमि सुतरां कृष्णः कुतो वानरः। राधेहं म
धुसूदनो व्रज लतां तामेव तन्वीमले इत्थं निर्वचनीकृतो दयितया ह्रीणो हरिः पातु वः॥३६॥ कस्यापि॥ ॥अथ दशावता
रः॥ ॥दिशपाद्धः शकुलाकृतिः स भगवान् श्रेयसीं संपदं यस्य स्फूर्जद्दृढपुच्छशिखरप्रेंखोलनक्रीडने। विक्षिप्ता
द्विसमुद्रजलकुलं नरे मंदाकिनीसंगतेर्गंगासागरसंगमप्रणयिनी जाता विहायस्थली॥३७॥ निःप्रत्यूहमनल्पक
ल्पचलितत्रैलोक्यरक्षागुरुः क्रीडाकूर्मकलेवरः स भगवान् दिश्यादमंदां मुदं। कल्पांतोदधिमध्यमज्जनवशाद्या
सर्पतः संलुठत्पृष्ठे यस्य बभूव सैकतकणच्छायं धरित्रीतलं॥३८ प्रध्वस्तदैत्यकुटुंबिनीजनमनःसंतोषसंकोचनः कुर्या
द्विघ्नमनश्वरं स भगवान् क्रोडावतारो हरिः। यद्दंष्ट्रांकुरकोटिकोटरकुटीकोणांतरस्थेयसी दृष्टा लात्पवदातके
तकदलाली नवत्वं गंगना॥३९॥ हनूमतः॥ वटिश्च टिति निर्मणिं छमिति वोच्छलच्छोणितेध गिधगिति मेदसि स्फुटरवोस्थि
चुष्टागिति पुनातु भवतो हरेरमरवैरिवक्षःस्थलक्षणत्करजपंजरक्रकचकाषजन्मानलः॥४०॥ वाक्पतिराजस्य॥ ऊ
र्ध्वांडछत्रदंडः शतधृतिभवनांभोरुहो नालदंडः क्षोणीनौकूपदंडः क्षरदमरसरित्पट्टिकाकेतुदंडः। ज्योतिश्चक्रा
क्षदंडस्त्रिभुवनविजयस्तंभदंडोंघ्रिदंडः श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदंडः॥४१॥ दंडिनः॥ किं दोर्भ्यां

वैदिक४॥२

किं शुकार्भकोपनिषदा स्वर्गप्रसादेन किं किं वेदाधिगमेन शास्त्रततिभिर्गोर्वं शोभ्व किं जन्मना। किं वानेन ममाद्भुतेन तपसा
पीडां कृतांतोपि वेद्धि प्राणां कुरुते नतरित्यनुशयो रामस्य पुष्णातु वः॥४१ हनूमतः॥ कूर्मो मूलवदालवालवदपां
राशिर्लतावद्दिशो मेघाः पल्लववत्प्रसूनफलवन्नक्षत्रसूर्येन्दवः। स्वामिन्व्योमतरुः क्रमेण मम कियानित्युक्तवति गोमा
रुतेः सीतान्वेषणमादिशन्दिशतु वो रामः सलज्जः श्रियं॥४२ कस्यापि॥ लक्ष्मीं नवयौवनोसि चपलाः प्रायेण गो
पांगनाः कंसो भूपतिरंबुनालमृदुलश्रीवावयं गोदुहः। तद्याचेंजलिना भवंतमधुना वृंदावने मद्विना मा मा गच्छ तु
नंदगोपवचसा न श्रीहरिः पातु वः॥४३ बिल्वमंगलश्रीचरणानां॥ ध्यानव्याजमुपेत्य चिंतयसि कामुन्मील्य चक्षुः क्षणं
पश्यानंगशरातुरं जनमिमं त्रातापि नो रक्षसि। मिथ्याकारुणिकोसि निर्दयतरस्त्वत्तः कुतोन्यः पुमानित्थं मार
वधूभिरित्यभिहितो बुद्धो जिनः पातु वः॥४४॥ श्रीहरिभट्टस्य॥ उद्यतकरकरवालः शकतिमिरध्वंसने महानिपुणः। क ८
कल्किर्हरिर्वः पायाद्यादपायतः कलिनिशांतो॥४५॥ शार्ङ्गधरस्य॥ पाठीनः कमठः किटिर्नरहरिः खर्वाकृतिर्भार्गवो
रामः कंसनिषूदनो दशबलः कल्कीव नारायणः। युष्माकं च विभूतयेस्तु भगवान्से दुर्मनंदिनो निधाबुत्तारायियुगे र
युगपतिस्त्रैलोक्यनाथो हरिः॥४६ हनूमतः॥ इति दशावतारः॥ ॥अथ लक्ष्मीः॥ पायात्पयोधिदुहितुः कपोलामल

चंद्रमाः। यत्र संक्रांतबिंबेन हरिणा हरिणाश्रितं॥४७ कस्यापि॥ उच्छिष्टं त्वा परतां तेन रमुरगपतौ पाणिनैकेन दत्वा दृष्ट्वा
वाथ्येनवासो विलुलितकबरी नारमं सेव हंत्वा। भूयस्तत्कालकांतिद्विगुणितसुरतप्रीतिना शौरिणा वः शय्यामा
लिंग्य नीतं वपुरलसलसद्बाहुलक्ष्म्याः पुनातु॥४८॥ निशानारायणस्य॥ अथ सूर्यः॥ सिंदूरस्तहयास्तशांतिकरि
णां कुंभस्थमाधोरणा निद्रीपल्लवशंकया वितनुते सो दुमौ ड्रोणिषु। कांताः कुंकुमशंकया करतलं मृद्गंति
लग्नं स्तयत्रे जनः प्रथमोद्भवं त्रमकरं सो रविरिं पातु वः॥४९ त्रिविक्रमस्य॥ जंभारातीभकुंभोद्भवमिव दधतः सांद्रसिंदू
ररेणुरक्ताः सिक्ता इवौघैरुदयगिरितटीधातुधाराद्रवस्य। आयांत्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयंतो भुवनमभिनवा भानवो भानवीयाः॥५०॥ नक्षि प्रक्षायदा तुं मुकुल(कमल)पुटकुटी कोटरक्रोडलीनां ल
क्ष्मीमाक्रष्टकामा इव कमलवनोद्घाटनं कुर्वते ये। कालाकारांधकारानन पतितजगत्साध्वसध्वंसकल्याः कल्याणं
वः क्रियासुः किशलयरुचयस्ते करा भास्करस्य॥५१ एतौ मयूरस्य॥ इति श्रीशा॰ आशीःपरिच्छेदः॥३॥ ॥अथ सुभाषितप्रशं
नर सा॥ संसदि दिव्यभूषणमुपकारकमवसरे धनं पुरुषं। सूक्तं दधति सुवर्णं कल्याणमनर्घ्यमिह धन्याः॥१॥ कस्यापि॥ सु
भाषितमयैर्द्रव्यैः संग्रहं न करोति यः। सोपि प्रस्तावयज्ञेषु कां प्रदास्यति दक्षिणां॥२ बाणाक्यस्य॥ कथमिह मनुष्यजन्मा
निंदोर्भुवशमामृतानद्भुदयैः सैसिंववं स्कुधसं तोषैनजलो नभुवस्त्त्रजनेधात्मप्रशसांच्यन्। मा यो वर्जयकर्मतिर्जयय श४ माध्विकश्रुत्कर्णयो अये यो धमरय
हित वारयम दश्वसंस्कृते स्मारयः॥१॥ कस्यापि॥ ३॥ उ॥

त्रिपात्रं रघुराजपुत्रः। स सर्व एवादिकवेः प्रभावो न कोपनीयाः कवयः क्षितींद्रैः। ७ बिल्हणस्य। उत्फुल्लगल्लैराला-
पः क्रीयं ते दुर्मुखैः सुखं जानाति हि पुनः सम्यक् कविरेव कवेः श्रमम्। ८ त्रिविक्रमभट्टस्य। शीलाविज्जामारुलामो- कारे
रिकाद्याः काव्यं कर्तुं संतु विज्ञाः स्त्रियोऽपि। विद्यां वेत्तुं वादिनो निर्विजेतुं विश्वं वक्तुं यः प्रवीणः स वंद्यः। ९ श्रीध- दर्दुरे
नरदेवानां। अपि स्वपदमुपयांतो वाग्विलासैः स्वकीयैः परभणितिषु तुष्टिं यांति संतः कियंतः। अपि घनम-
करंदस्पंदपूर्णालवालः कनककलशसेकं नेहते किं रसालः। १० जयदेवस्य। ते धन्यास्ते महात्मानो येषां
लोके स्थितं यशः। यैर्निबद्धानि काव्यानि ये च काव्येषु कीर्तिताः। ११। कस्यापि। जयंति ते सुकृतिनो रससि-
द्धाः कवीश्वराः। नास्ति येषां यशःकाये जरामरणजं भयं। १२ भर्तृहरेः। महीपतेः संति न यस्य पार्श्वे कवीश्वरा-
स्तस्य कुतो यशांसि। भूपाः कियंतो न बभूवुरुर्व्यां नामापि जानाति न कोऽपि तेषां। १३ बिल्हणस्य। अर्थान्के-
चिदुपासते कृपणवत्केचित्त्वलंकुर्वते वेश्यावत्खलु धातुवादिन इवोद्बध्नंति केचिद्रसान्। अर्थालंकृतिसद्रस- २२
द्रवमुचां वाचां प्रशस्तिस्पृशां कर्तारः कवयो भवंति कतिचित्पुण्यैरगण्यैरिह। १४। राघवचैतन्यश्रीचरणानां।
कविवाक्यामृततीर्थस्नानैः पूता भृशं यशोदेहाः। येषां त एव भूपा जीवंति गतास्तथैवान्ये। १५। अमृतोत्सेकणो वा-
= वागंकुर्वंत्युरगपन्नगाः।

=यो। १

रुरशेषजनसज्जनः। कविर्गरुडवन्माद्यः इंद्रवज्रादिवृत्तकृत्। १६। कस्यापि। काव्यमध्यं गिरो यावच्चरंति विशदा
भुवि। तावत्सारस्वतं स्थानं कविरासाद्य तिष्ठति। १७। इति शा॰ सामान्यकविप्रशंसापरिच्छेदः। ७ ॥ ॥
अथ विशिष्टकविप्रशंसा। कवींदुं नौमि वाल्मीकिं यस्य रामायणी कथा। चंद्रिकामिव चिन्वंति चकोरा इव सा-
धवः। १ शार्ङ्गधरस्य। श्रवणांजलिपुटपेयं विरचितवान्भारताख्यममृतं यः। तमहमरागमकृष्णं कृष्णद्वैपा-
यनं वंदे। २ कस्यापि। त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः। त्रयो दंडिप्रबंधाश्च त्रिषु लोकेषु विश्रुताः।
३। राजशेखरस्य। कवयः कालिदासाद्याः कवयो वयमप्यमी। पर्वते परमाणौ च पदार्थत्वं प्रतिष्ठितं। ४ कस्या-
पि कृष्णभट्टस्य। कविरमरः कविरचलः कविरभिनंदश्च कालिदासश्च। अन्ये कवयः कपयश्चापलमात्रं प-
रं दधति। ५। कस्यापि। श्लेषे केचन शब्दगुंफविषये केचिद्रसे चापरेऽलंकारे कतिचित्सदर्थविषये चान्ये क-
थावर्णकाः। आः सर्वत्र गभीरधीरकविताविंध्याटवीचातुरीसंचारी कविकुंभिकुंभभिदुरो बाणस्तु पंचा-
ननः। ६ श्रीचंद्रदेवानां। भवभूतिमनादृत्य निर्वाणमतिमान्यथा। मुरारेः पदचिंतायामिदमाधीयते मनः।
७। कस्यापि। शब्दार्थयोः समो गुंफः पांचाली रीतिरुच्यते। शीलाभट्टारिकावाचि बाणोक्तिषु च सा यदि। ८।

कस्यापि। नीलोत्पलदलश्यामां विज्जकां मामजानता। वृथैव दंडिना प्रोक्तं सर्वशुक्ला सरस्वती॥ ९ विज्जकायाः॥
इंदुप्रभारसविडंबि हिगं विहाय कीरानने स्फुरसि नारतिकारतिस्ते। आद्यं यदि श्रयसि उत्पतु कौमुदीनां
गोविंदराजवचसां च विशेषमेषः॥ १० देवेश्वरस्यायं एवं वाग्देवी शुकूरसितवासव्यसनिनी ऊर्हकंठीकंठे वि
लसति तथा वेदनविधिः। तदा भूमी भोगे निरुपममतं किंचिदिव वा समाधत्ते साम्यं धनदहतणिनीनां
मधुरिमा॥ ११ श्रीधनददेवानां नमुग्धदयिताधरेन विषनाजिरत्नाकरेन राहुमुख कोटरेन किलता यपि
द्योतरो सुदर्शनकवीश्वरे रसिकवक्रकचूडामणौ गुणौकसि सुधां बुधा स्त्यजत सांद्रवोद्रत्नमो॥ १२ श्रीहरि
हरदेवानां। सरस्वतीचकर्णाटी विजयांका जयत्यसौ। यावैदर्भगिरां वासः कालिदासादनंतरो॥ १३ कस्या
पि। माघेन विघ्नितोत्साहा नोत्सहंते पदक्रमे। स्मरंतो भारवेरेव कवयः कपयो यथा॥ १४ धनपालस्य। हृदि ल १२
ग्नेन बाणेन यन्मंदोपि पदक्रमः। भवेत्कविकुरंगाणां चापलं तत्र कारणं॥ १५ तावत्कवि विहंगानां ध्वनिर्लो
केषु संस्यते। यावन्नो विशति श्रोत्रे मयूर मधुरध्वनिः॥ १६ त्रिलोचनस्य तौ। भासोरामिलसौमिलो वररुचिः
श्रीसाहसांकः कविर्मेंठो भारविकालिदासतरलाः स्कंधः सुबंधुश्च यः दंडी बाणदिवाकरौ गणपतिः कांत
श्च रत्नाकरः सिद्धा यस्य सरस्वती भगवती के तस्य सर्वेपि ते॥ १७॥ अहो प्रभावो वाग्देव्या यन्मातंगो दिवाकरः। श्रीहर्ष
स्याभवत्सभ्यः समो बाणमयूरयोः॥ १८॥ सरस्वती पवित्राणां जातिस्तत्र न दे हिनां। व्यासस्पर्द्धी कुलालो भूद्यद्
द्रोणो भारते कविः॥ १९ राजशेषरस्यैते॥ इति शा॰ विशिष्टकविप्रशंसापरिच्छेदः॥ ॥अथ कुकविनिंदा॥ अप्रग
ल्भाः पदन्यासे जननीरागहेतवः। संत्येके बहुलालापाः कवयो बालका इव॥ १ त्रिविक्रमभट्टस्य। गणयंति
नापशब्दं न वृत्तभंगं क्षयं न चार्थस्य। रसिकत्वेनाकुलिता वेश्यापतयः कुकवयश्च॥ २ कस्यापि। द्राधीयसाधमा
गुणेन युक्ताः के के रहट्टघटीपूरकाव्यखंडैः। आडंबरं ये वचसां वहंति ते केपि कंथाकवयो जयंति॥ ३ कविविल्ह
णस्याधिक्षांते कलिकालजौ हि विलयं के यं विपर्यस्तता हा कष्टं श्रुतिशालिनां व्यवहृति म्लेच्छो वितंडापते
एके वाङ्मयदेवता भगवती विक्रेतुमानीयते निःशंकैरपरैः परीक्षणविधौ संवर्गिमुह्याद्यते॥ ४॥ विल्हणस्य॥
कविभिर्नृपसेवासु चित्रालंकारहारिणी। वाणी वेश्येव लोभेन परोपकरणी कृता॥ ५ क्षेमेंद्रस्य॥ अन्यवर्ण
परावृत्त्या बंधचिह्ननिगूहनैः। अनाख्यातः सतां मध्ये कविश्चौरो विभाव्यते॥ ६ इति शा॰ कुकविनिंदापरि
च्छेदः॥ ॥अथ पंडितप्रशंसा॥ अधिगतपरमार्थान्पंडितान्मावमंस्थास्तृणमिव लघुलक्ष्मीर्नैव तान्संरुणद्धि
श्रष्टः॥१

=कवयानिरा मकवी द्रेकवर्यं यन्येपि किंक्रम्म ४॥ न्ठयति पिनाकपाणौ श्चन्द्र्यं यन्येपि भूत विताला ४॥१॥ ८२ –

=मधकगमधौत्पन्नान्न तयुगकमन्तिसारिण ४ कस्मात्॥ इति रोषाद्दिवकूलिनापीर्ध्यं ते साधव ४ सनती॥ १॥ दीपक॥ ७५

किं वा परेण बहुना परिजल्पितेन संसर्ग एव महतां महते फलाय। अंभोनिधेस्तरुहास्तरवेऽपि येन वेलाजलोच्छलि-
तरत्नकृतालवालाः॥५॥ आपत्स्वेव हि महतां शक्तिरभिव्यज्यते न संपत्सु। अगुरोस्तथा न गंधः प्रागस्ति यथाग्निपति-
तस्य॥६॥ कयोरप्यन्तो वज्रादपि कठोराणि मृदूनि कुसुमादपि। लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥७॥ जय-
भूतेः। जितरोषरया महाधियः सपदि क्रोधजितो लघुर्जनः। विजितेन जितस्य दुर्मतेर्मतिमद्भिः सह का विरोधि-
ता॥८॥ माघकवेः। गवादीनां पयोऽन्येद्युः सद्यो वा दधि जायते। क्षीरोदधेस्तु नाद्यापि महतां विकृतिः कुतः॥९॥ देवेश्व-
रस्य। संपदो महतामेव महतामेव चापदः। वर्धते क्षीयते चंद्रो न तु तारागणः क्वचित्॥१०॥ अपकुर्वन्नपि श्रा-
यः प्राप्नोति महत्फलं। निर्वहंतमेवाग्निं संतर्पयति सागरः॥११॥ तरुमूलादनुनिहितं जलमाजलमाविर्भ-
वति पल्लवाग्रेषु। निभृतं यदुपक्रियते तदपि महोनोवहंत्युच्चैः॥१२॥ महतां प्रार्थनेनैव विपत्तिरपि शोभते। दं- १६
तभंगो हि नागानां श्लाघ्यो गिरिविदारणे॥१३॥ अचिंत्याः पंथानः किमपि महतामंधकरिपोर्यदक्ष्णो भूत्ते-
जस्तदकृत कथामप्यमदनां। मुनेर्नेत्राद्वैयर्दजनि पुनर्ज्योतिरहह प्रतेने तेनेदं मदनमयमेव त्रिभुवनं॥
१४॥ केषामप्येते महात्मानो तुष्ट्यर्हंति न जमानोऽब्धिर्भूत्वापि सपत्नीः प्रापयत्पद्मिं सिंधवो नगनिम्नगाः॥१५॥

माघकवेः। इति श्री॰ महतां प्रशंसापरिच्छेदः॥१२॥ ॥अथ धीरप्रशंसा॥ सह परिजनेन विलसति धीरो गहनानि त-
रति पुनरेकः। विषमेकेन निपीतं त्रिपुरजिता सह सुरैरमृतं॥१॥ कस्यापि। निंदंतु नीतिनिपुणा यदि वा स्तुवंतु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं। अद्यैव वा मरणमस्तु युगांतरे वा न्याय्यात्पथः प्रविचलंति पदं न धीराः॥२॥
भर्तृहरेः। श्लाघ्या महतामुन्नतिरद्भुतमध्यवसितं च धीराणां। कनकगिरिर्न तिलं ध्रुवोरविरनिशमनुक्षितारं भेः॥
३॥ कस्यापि। कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुं। अधोमुखस्यापि कृतस्य वह्नेर्नाधः
शिखा याति कदाचिदेव॥४॥ कस्यापि। येऽदीनेषु दयालवः स्पृशति यानल्पोऽपि न श्रीमदो व्यग्रा ये च परोपका-
रकरणे हृष्यंति ये याचिताः। स्वस्थाः संति च यौवनोदयमहाव्याधिप्रकोपेऽपि ये ते स्तंभैरिव सुस्थितैः कलि-
भरक्लांता धरा धार्यते॥५॥ कस्यापि। अर्थः सुखं कीर्तिरपीह मा भूदनर्थ एवास्तु तथापि धीराः। निजप्रतिज्ञा-
मनुरुध्यमाना महोद्यमाः कर्म समारभंते॥६॥ कस्यापि। अंगणवेदी वसुधा कुल्या जलधिः स्थली च पाता-
लं। वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य धीरस्य॥७॥ बाणभट्टस्य॥ इति श्री॰ धीरप्रशंसापरिच्छेदः॥ ॥
अथ सज्जनप्रशंसा। उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमं। सज्जनानां स्वभावोऽयं केनेंदुः शिशिरीकृतः॥

= अयं कुरङ्गारस्तु रुरामपुष्यो वितै॥ गवा ग्रजन्मनां तातनरस्स रखवो वयं॥ द्वार ४ कठे विशन्तु यदि वा तीक्ष्णधार ४ ऊठार ४ श्रीणां नेत्रे निर्विशन्तु पुनः ४ कज्जलं वा ऽ
= लीवा। सेर्व्या मो धुवमिहस्तु रवं प्रतन्नहुखैवाय वान द्वान वन्तु न वयं आत्मुणे प्रवीरा ४॥२॥ अन्यत ४ क्षेपको॥ ३२१

ने२

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वंति साधवः। न हि संहरते ज्योत्स्नां चंद्रश्चंडालवेश्मनि॥२ उपकारिषु यः साधुः सा
धुत्वे तस्य को गुणः। अपकारिषु यः साधुः स साधुः सद्भिरुच्यते॥३ अपेहंतेन चस्नेहं न पाकं न दशांतरे। सदाप
रोपकाराय संतदीपा इवोत्तमाः॥४॥ हृदयानि सतामेव कठिनानीति मे मतिः। खलवाग्विशिखैस्तीक्ष्णैर्भिद्यंते न
मनागपि॥५ केषामप्येते॥ उपचरितव्याः संतो यद्यपि कथयंति नैकमुपदेशं। यास्तेषां स्वैरकथास्ता एव भवं
वि ति शास्त्राणि॥६ नरहरेः॥ सुजनो न याति विकृतिं परहितनिरतो विनाशकालेपि। छेदेपि चंदनतरुः सुरभयति
मुखं कुठारस्य॥७ वितुलस्य॥ अतिकुपिता अपि सुजना योगेन मृदूभवंति न च नीचाः। हेम्नः कठिनस्यापि द्रवणो
पायोस्ति न तृणानां॥८ कस्यापि॥ अनुकुरुतः खलसुजनावग्रिमपाश्चात्यभागयोः सूच्याः। विदधाति रंध्रमेको कौ॥ ५
गुणवानन्यस्तु पिदधाति॥९॥ गोवर्द्धनस्य॥ सितोपि संतः ककिरंतु तेजः कडुक्षलेऽनकेनतु प्रथंते॥ विद्यापरुद्धान १५
तु वेधसेव ब्रह्मांडकोशे घटदीपकल्पाः॥१०॥ गोत्रास्कितिं न मुंचंति सहासन्नतिमाश्रिताः। उदवंतश्च संतश्च सम
हासत्त्वतयानयाः॥११ ब्रूते न्यस्यासतो प्यायोऽगुणां दोषांस्तु दुर्जनः। अन्येष्वसत्स्वपि किं चैको गच्छत्यर्थमधोपरा
॥१२॥ आत्मानमन्यं सुजनाः परोपकारैककरणदुर्ललिताः। संतापितपिशुनेषु स्वगुणेष्वपि हंत खिद्यंते॥१३॥ प

प्रमपर्वणि॥ स्वयपष्ठः अनुष्टुत्तेनप्रति॥ सल्लसतां संगतैर्लिप्सितथैनतथपरैरन्वितानाबियशोनातिक्रमेभ्यस्तुकषेणसंगतं तस्मात् सतां संगतैर्लिप्सितव्यं॥१॥ रू. इंस तां संगते दव
निर्येष्ट्रया॥ र्थस्वार्थ... जीतः॥ म स्वार्थविसतुकषेण संगतं तस्मात् सतां नलिप्सितधीरथ॥२॥ इंदेण सरूसंध्यर्थ॥३एणि

दमीदशांतिदशानारसना तस्वादुसुखमनुभवति। प्रकृतिरियं विमलानां क्लिश्यंति यदन्यकार्येषु॥१४॥ देवेश्वरस्य॥ श
रदि न वर्षति गर्जति वर्षति वर्षासु निःस्वनो मेघः। नीचो वदति न कुरुते न वदति सुजनः करोत्येव॥१५॥ अद्यापि नोज्झति
हरः किल कालकूटं कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे। अंभोनिधिर्वहति दुःसहवाडवाग्निमंगीकृतं सुकृतिनः परि
:ध्यावसाध पालयंति॥१६ आदिमध्यांतविषये सौहृदं सज्जने भवति नेतरे जने। छेदतापननिघर्षताडनैर्नान्यथा भवति पत्यातिकांच
नं॥१७॥ ये जाते व्यसने निराकुलधियः संपत्सु नात्युन्नताः प्राप्ते नैव पराङ्मुखाः प्रणयिनि प्राणोपयोगैरपि। ह्रीमंत
स्वगुणप्रकाशनविधौ विस्पष्टसुत्तोपंडितास्ते भूमंडलमंडनैकतिलकाः संतः कियंतो जनाः॥१८ न मुखादुज्झिरत्न
र्ध्वं हृदयान्न नयत्यधः। जरयत्यंतरे साधुर्दोषं विषमिवेश्वरः॥१९॥ तदपकृतिं विधिनार्थिषु यसंतः स्वल्पसंपदो विहिताः।
तुच्छेपयसि घनानां सीदति तबेजी वल्लोकोयं॥२० केषामप्येते॥ नूनं दग्धा विमोच्छा विमो सुजनदुर्जनौ॥ किं लिंदोः सोद
रः सर्वे कालकूटस्य चेतरः॥२१ राजशेखरस्यौ॥ इति श्री सज्जनप्रशंसापरिच्छेदः॥१४॥ ॥ अथ मनस्विप्रशंसा॥ कामं
प्रियानपि प्राणान्विमुंचंति मनस्विनः। इच्छंति न त्वमित्रेभ्यो महतीमपि सत्क्रियां॥१ नच्छों॥ अदृष्टमुखभंगस्य मुकर्म
धस्य या विर्त्तु॥ अहो बत महत्कष्टं चक्षुष्मानपि याचते॥२॥ कस्यापि॥ कुएपे ग्रामे वने वा महति सितपटच्छन्नपालीकपा
लीमादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकंठे। द्वारं द्वारं प्रवृत्तो वरमुदरदरीपूरणाय क्षुधार्तो मानी प्राणी स

देशेन पुनरनुदिनं तु त्यक्त्वा येषु दीनः ॥३॥ वरमहिमुखे क्रोधौते करो निवेशितो विषमपि वरं पीत्वा सुप्तं हतं न निवेशने। गिरि
वरतटान्मुक्तः श्वात्मा वरं शतधा हतो न तु खलजनावासैरर्थैः हतं हितमात्मनः ॥४॥ अलं रंकियद्वस्तु तत्र वसुधापिंडं
किमावद्यते तत्राप्येकतरं तु खंडमपि तास्त स्मिन्नृपाः के चना। ते भ्यो दैन्यत्रातोपनीत विनवादृष्टानुकंपासु तेधिगमू
ढाः स्पृहयंति हंत किमपि स्वार्थेन तेभ्यो पिये ॥५॥ आदेवगणदेवानोपाताल न्नविमोचितो बतबलिनीतो न मृत्युः त्वयेन
नृष्टं शशलांछनस्य मलिनं नोन्मूलिता व्याधयः। शेषः स्यापि धरां विधृत्य न हतो भारावतारः क्षणं चेतः सत्पुरुषा
भिमानमुनि शं मिथ्या वहं खिद्यसे ॥६॥ एकः स एव जीवे निहृदयविहीनोपि सहृदयो राहुः। यः सकललघिमभाजन
मुदरं न बिभर्ति दुःसहं ॥७॥ वरं हालाहलं पीतं सद्यः प्राणहरं विषं। न तु दृष्टं धनांधस्य भ्रूभंगकुटिलं मुखं॥ पात्रेषुपकुर्वन्न
बद्धापि न भवति सर्वोपकारिणा तुल्यः। एकोनुकरोति कृतं निःकारणमेव कुरुते यः ॥९ कामं वनेषु हरिणास्तृणेन जी
वं त्यय न सुलभेन। धनिषु न दैन्यं विदधति ते किल पशवो वयं सुधियः ॥१० भूते न तनकूष्मांडफलानां केन वेत्यमी। अंगुली १९
दर्शनाद्येन विलीयंते मनस्विनः ॥११ कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः। मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥१२
पादाहतं यदुत्थाय मूर्धानमधिरोहति। स्वस्थादेवापमानेपि देहिनस्तद्वरं रजः ॥१३ मा जीवन्यः परावज्ञादुःखदग्धोपि
जीवति। तस्याजननिरेवास्तु जननी क्लेशकारिणः ॥१४॥ समूलघातनिघ्नंतः परान्नोद्यंति मानवः। प्रध्वंसितांधतमसस्त

त्रोदाहरणं रविः ॥१५॥ एते माघकवेः ॥ इति शा॰ मनस्विप्रशंसापरिच्छेदः ॥१५॥ ॥ अथोदारप्रशंसा॥ आकारमात्रविज्ञातसंपा
दितमनोरथाः॥ ते धन्या ये न शृण्वंति दीनाः प्रणयिनां गिरः ॥१ देहि देहीति जल्पंति त्यागिनोप्यर्थिनोपि वा। आलोकयंति र
त्नसादस्ति नास्तीति न कश्चित्। स्युधियं ते पारिपशवः पटंतिष्ठुकसारिकाः। दातुं शक्नोति यो वित्तं स शूरः स च पंडितः ॥३॥
एकेन तिष्ठताधस्तादन्येनोपरि तिष्ठता। दातृयाचकयोर्भेदः कराभ्यामेव सूचितः ॥४॥ सैव परं न विनश्यति ननु रपिया
श्रीर्निवेशिता सत्सु। अवशिष्यते हिमांशोः सेवकलायास्थिताशेनो ॥५॥ अयं निजः परो वेति गणना लघुचेतसां।
उदारचरितानां तु वसुधैव कुटुंबकं ॥६ बोधयंति न याचंते भिक्षाचारा गृहे गृहे। दीयतां दीयतां नित्यमदातुः फलमी
दृशं ॥७ केषामप्येते। अर्थिनां कृपणादृष्टिस्त्वन्मुखे पतिता सकृत्। तदवस्था पुनर्देव नान्यस्य मुखमीक्षते ॥८ दरिद्रान्
य इदानीं विशिष्टेभ्यो याचमानान् सुदिने दिने। नश्येद्विश्रमहं मन्ये शेषमन्यस्य रक्षसि ॥९॥ भगवतो व्यासस्य। किं तया क्रियते
लक्ष्म्या या वधूरिव केवला। या तु वेश्येव सा मान्या पथिकैरुपभुज्यते ॥१० विक्रमादित्यस्य। लक्ष्मीपयोधरोत्संगकुंकुमा
रुणितो हरेः। धन्यो बलिः स येनास्य भिक्षापात्रीकृतः करः ॥११ कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः। ददौ दधीचि
रस्थीनि नास्त्यदेयं महात्मनां ॥१२ द्विरिशरं नाभिसंधत्ते द्विः स्थापयति नाश्रितान्। द्विर्ददाति न चार्थिभ्यो रामो द्विर्नाभिभा
षते ॥१३ केषामप्येते। दानानीव पिसव्यः स्यान्निःफलो न महानपि। जलार्थिवारिधिं त्यक्त्वा पश्य कूपं निषेवते ॥१४ इति शा॰

॥ शिरेन सविलं दिनी धरविधानशीतये । का कपक्षधरमेव यथा विनिस्कोज्झसो दिनवयः समीक्ष्यते ॥ ॥ कालिदासस्य ॥ ८ ॥

उदारप्रशंसापरिच्छेदः ॥१७॥ ॥ अथ तेजस्विप्रशंसा ॥ बालस्यापि रवेः पादाः पतंत्युपरि भूभृतां । तेजसा सह जातानां
वयः कुत्रोपयुज्यते ॥१॥ सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु । प्रकृतिरियं सत्ववतां न खलु वयस्ते
जसो हेतुः ॥२॥ तेजोसि यस्य प्रशमं प्रयाति वारां प्रहारेण स वह्निरस्य ॥ अयं पुनर्वाडवनामधेयः समुद्रमाधाय बिभ
र्ति तेजः ॥३॥ एकः स एव तेजस्वी सिंहिकेयः सुरद्विषां । शिरोमात्रावशेषेण जीयंते येन शत्रवः ॥४॥ केषामप्येते ॥ मौनी
पादप्रहारेपि न लक्ष्मीनीचवक्षाः । आकृष्टशस्त्रो मित्रेपि न तेजस्वी रवक्लो हि सः ॥५॥ क्षेमेंद्रस्य ॥ तुल्येपराधे स्वर्भानु
र्भानुमंतं चिरेण यत् । हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलं ॥६॥ माघकवेः ॥ तेजस्विनि क्षमासारे नातिकर्कशमाचरे
त् । अतिनिर्मथनादग्निश्चंदनादपि जायते ॥७॥ तेजोहीनो महीपालो स्वाः परे च विक्रवंतो निःशंको हि जनो धत्ते पदं
भस्मन्यशुक्षणि ॥८॥ इति शा॰ तेजस्विप्रशंसा ॥२७॥ ॥ अथ गुणप्रशंसा ॥ गुणाः कुर्वंति दूतत्वं दूरेपि वसतां सतां ॥ २१
केतकीगंधमाघ्राय स्वयं गच्छंति षट्पदाः ॥१॥ गुणवज्जनसंसर्गाद्याति स्वल्पोपि गौरवं । पुष्पमालाप्रसंगेन सूत्रं शिरसि
धार्यते ॥२॥ गुणाः सर्वत्र पूज्यंते पितृवंशो निरर्थकः । वासुदेवं नमस्यंति वसुदेवं न मानवाः ॥३॥ गुणिनि गुणज्ञो रमते ना
गुणशीलस्य गुणिनि परितोषः । अलिरेति वनात्कमलं न दर्दुरस्त्वेकवासोपि ॥४॥ नीरसान्यपि रोचंते कर्पासस्य फलानि नः ।
येषां गुणमयं जन्म परेषां गुह्यगुप्तये ॥५॥ गुणा गुणज्ञेषु गुणीभवंति ते निर्गुणं प्राप्य भवंति दोषाः । सुस्वादुतोयाः प्रभवंति

नद्यः समुद्रमासाद्य भवंत्यपेयाः ॥६॥ गुणिनं जनमालोक्य निजबंधनशंकया । राजहंसस्त्रीः कुरंगीवद्दूरं पलायते ॥७॥
गुणैः सर्वत्र कश्चोपि सीदत्येको निराश्रयः । अनर्घमपि माणिक्यं हेमाश्रयमपेक्षते ॥८॥ गुणेषु क्रियतां यत्नमाटोपैः किं
प्रयोजनं । विक्रीयंते न घंटाभिर्गावः क्षीरविवर्जिताः ॥९॥ गुणैर्गौरवमायाति न महत्यापि संपदा । पूर्णेंदुर्न तथा वंद्यो
निःकलंको यथा कृशः ॥१०॥ न सौख्यसौभाग्यकरा गुणा नृणां स्वयं गृहीताः सुदृशां स्तना इव । परैर्गृहीता द्वितयं वितन्व
ते न तेन गृह्णंति निजं गुणं बुधाः ॥११॥ कोशेयं कृमिजं सुवर्णमुपलाद्दूर्वापि गोरोमतः पंकात्तामरसं शशांकमुदधेरिंदीव
रं गोमयात् । काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छंति किं जन्म
ना ॥१२॥ केषामप्येते ॥ गुणैरुत्तमतां याति नोच्चैरासनसंस्थितः । प्रासादशिखरस्थोपि काकः किं गरुडायते ॥१३॥ नरहरेः ॥
गुणवंतः क्लिश्यंते प्रायेण भवंति निर्गुणाः सुखिनः । बंधनमायांति शुका यथेष्टसंचारिणः काकाः ॥१४॥ गुणो दूषणतां या
ति दूषणं गुणतां क्वचित् । तथा हि निश्चला दोषस्तनयोः स्तब्धता गुणः ॥१५॥ अहो वैचित्र्यमेतस्य संसारस्य किमुच्यते । गु
णोपि क्लेशहेतुः स्याद्विश्रांतः कंटकैर्दलैः ॥१६॥ अनवसरे गुणवानपि हृदयादुत्तार्यते हारः । पश्य शलाकावसरे तृणेपि
नृपैः प्रसार्यते स्वकरः ॥१७॥ केषामप्येते ॥ इति शा॰ गुणप्रशंसा ॥२९॥ ॥ अथ संतोषप्रशंसा ॥ अहत्वा परसंतापमग
त्वा खलनम्रतां । अनुसृत्य सतां वर्त्म यत्स्वल्पमपि तद्बहु ॥१॥ व्यासस्य ॥ वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या सम इह प

रितोषे निर्विशेषो विशेषः। स हि भवति दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः॥१॥ नर्ईहरेः। दरिद्र
स्य परा मूर्त्तिस्तृष्णा न द्रविणाल्पता। जरद्गवधनः शंभुस्तथापि परमेश्वरः॥२॥ विष्णुशर्मणः। संतोषामृततृप्तानां यत्सुखं शां
तचेतसां। कुतस्तद्धनलुब्धानामितश्चेतश्च धावतां॥४॥ जन्मांतरसहस्रेषु या बुद्धिर्भाविता पुरा। तामेव भजते जंतुरुपदे
शो निरर्थकः॥५॥ क्षेपकः। आगमिष्यंति ते भावा ये भावा मयि भाविताः। अहं तैरनुगंतव्यो न ते षामन्यतो गतिः॥५॥ यो मे ग
र्भगतस्यापि वृत्तिं कल्पितवान्प्रभुः। शेषवृत्तिविधाने न स किं सुप्तोऽथवा मृतः॥६॥ अप्रार्थितानि दुःखानि यथैवायांति देहिनां।
सुखान्यपि तथा यांति दैन्यमत्रातिरिच्यते॥७॥ पंचमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे। अनृणी चाप्रवासी च स वारिचर मो
दते॥८॥ आत्माधीनशरीराणां स्वपतां निद्रया सह। कदन्नमपि मर्त्यानाममृततया यकल्पते॥९॥ सर्वत्र संपदस्तस्य संतुष्टं
यस्य मानसं। उपानद्गूढपादस्य ननु चर्मास्तृतेव भूः॥१०॥ भगवतो व्यासस्यैतौ॥ आरोग्यं विद्वत्ता सज्जनमैत्री महाकुले जन्म। स्वा
धीनता च पुंसां महदैश्वर्यं विनाप्यर्थैः॥११॥ सर्पाः पिबंति पवनं न च दुर्बलास्ते शुष्कैस्तृणैर्वनगजा बलिनो भवंति। कंदैः फलै | १८
र्मुनिवराः क्षपयंति कालं संतोष एव पुरुषस्य परं निधानं॥१२॥ अर्थी करोति दैन्यं लब्धार्थो गर्वपरितोषं च। नष्टधनश्च सशो
कं सुखमास्ते निःस्पृहः पुरुषः॥१३॥ तन्मूलं गुरुतायास्तो रवं न यशस्तदोर्जितं। तत्सौभाग्यं पुंसां यदेतदप्रार्थनं नाम॥१४॥ के॰
इति शा॰ संतोषप्रशंसा॥१९॥ ॥अथ संसर्गप्रशंसा॥ महानुभावसंसर्गः कस्य नोन्नतिकारकः। रथ्यांबु जाह्नवीसंगात्त्रिदशै

रपि सेव्यते॥१॥ द्रवत्वात्सर्वलोहानां समत्वान्मृगपक्षिणां। भयाल्लाभाच्च मूर्खाणां दर्शनात्संगतां सतां॥२॥ विहितं नैव गच्छंति संगदोषेण साध
वः। आवेष्टितं महासर्पैश्चंदनं न विषायते॥३॥ नस्थानत्यं नगेतवत्कणमप्यधमैः सह। पयोपि शौंडिनीहस्ते मदिरां मन्यते जनाः॥४॥ वी
णावंशाश्रयं तुंबं तुंबस्तु येन च श्रियो तनुनापि संयोगाद्गुणेन कंचरोयथा॥५॥ किंचिदाश्रयसौंदर्याद्धत्ते शोभामसाध्वपि। कांताविलोचनन्यस्तं मलीमसमिवांजनं॥६॥ आश्रयवशेन सततं गुरुता लघुता च जायते जंतोः। विंध्ये विंध्यसमानाः करिणो बत दर्पणे लघवः॥
७॥ संसर्गाद्भवति हि साधुता खलानां साधूनां न च खलसंगमात्खलत्वं। आमोदं कुसुमभवं मृदेव धत्ते मृद्गंधं न च कुसुमानि धारयंति॥
८॥ असाधुः साधुर्वा भवति खलु जात्यैव पुरुषो न संगाद्दौर्जन्यं न हि सुजनता कस्य विदपि। प्ररूढे संसर्गे मणिभुजगयोर्जन्मजनि
तमणिनीहिदोषास्पृशति न तु सर्पो मणिगुणान्॥९॥ केषामप्येतौ। संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते मुक्ताकारतया
तदेव नलिनीपत्रस्थितं राजते। स्वात्यां सागरशुक्तिसंपुटगतं तज्जायते मौक्तिकं प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते॥१॰
अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च पुरुषविशेषं प्राप्य भवंति योग्या अयोग्याश्च॥११॥ एतौ विष्णुशर्मणः॥ इति शा॰ संस
र्गप्रशंसा॥२०॥ ॥अथ धनप्रशंसा॥ जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतां शीलं शैलतटात्पतत्वभिजनः संदह्यतां
वह्निना। शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोस्तु नः केवलं येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे॥१॥ यस्यास्ति वित्तं स नरः कु
सुशीलः लीनः स पंडितः स श्रुतवान्गुणज्ञः। स एव वक्ता स च दर्शनीयः सर्वे गुणाः कांचनमाश्रयंति॥२॥ एतौ भर्तृहरेः। वयोवृद्धास्तपोवृद्धा ये च वृ

नवकुश्रुताः।सर्वेतिधनवद्वास्यद्वारेतिष्ठंतिकिंकराः।३चाणक्यस्य।हेतुप्रमाणयुक्तंवाक्यंनश्रूयतेदरिद्रस्य।अप्यतिपुरुषमसत्यं
सर्व्यंवाक्यंसमृद्धस्य।४।क्षेमेंद्रस्य।अर्थार्थीजीवलोकोयंश्मशानमपिसेवते।जनितारमपित्यक्त्वानिःस्वंगच्छतिदूरतः।५।
नसाविद्यानतच्छीलंनतद्दानंनसाकला।अर्थार्थिभिर्नतद्योर्यधनिनायन्नकीर्त्यते।६जयथामिषंजलेमत्स्यैर्भक्ष्यतेश्वाप
दैर्भुवि।आकाशेपक्षिभिश्चैवतथासर्वत्रवित्तवान्।७अनवित्तंदर्शयेत्प्राज्ञःकस्यचित्स्वल्पमप्यहो।मुनेरपियतस्तस्यदर्श
नाच्चलतेमनः।८।एतौविष्णुशर्मणः।लक्ष्म्याःपरिपूर्णोहंनभयंमेस्तीतिमोहनिद्रेषा।परिपूर्णस्यैवेंदोर्भवतिनयंक्षितिहिका
स्मनो।९नक्तेद्वेषोजडेप्रीतिरुरुचिर्गुरुलंघनो।मुखेकटुकतानित्यंधनिनांज्वरिणामिव।१०आलिंगिताःपरैर्यातिप्रस्खलंति
समेपथि।अव्यक्तानिवचनानिधनिनोमद्यपाइव।११पतंतिखड्गधारासुविशंतिमकरालये।किंनकुर्वंतिसुभगेकष्टमर्था
र्थिनोजनाः।१२गुणयुक्तोप्यधोयातिरिक्तःकूपेघटोयथा।निर्गुणोपिभृतःपश्यजनैःशिरसिधार्यते।१३केषामप्येतौ।इति
रा०धनप्रशंसा।।२१।। ।।अथदुर्जननिंदा।खलःसर्षपमात्राणिपरच्छिद्राणिपश्यति।आत्मनोबिल्वमात्राणिपश्यन्नपि १७
नपश्यति।१।नविनापरवादेनरमतेदुर्जनोजनः।काकःसर्वरसान्भुंक्तेविनामेध्यंनतृप्यति।२एतौव्यासस्य।परितोषयितानक
श्चनस्वगतोयस्यगुणोस्तिदेहिनः।परदोषकथाभिरल्पकःस्वजनंतोषयितुंकिलेच्छति।३सहजांधदृशःसुदुर्णयेपरदोषेक्ष
णदिव्यचक्षुषः।स्वगुणोच्चगिरोमुनिव्रताःपरवर्णग्रहणेष्वसाधवः।४एतौमाघकवेः।विषधरतोप्यतिविषमःखलइतिन
*अशनामाननृतंतन्वयासुरोरपिश्रुतोपिभुनोकृतनेत्रली।अपिबद्धपल्लतास[illegible]तारवलेनखलु[illegible]लतिखलतिकायथा।।।कृत्यापि।।२४।।

[illegible]रादयाधिकायतेखल्वथायदिवन्तिखउद्धरा(एप)सोशितिदृष्टेरूपदेष्टुमिच्छति।।१।। कृत्यापि।।३४

ऋषावदंतिविद्वांसः।यदयंनकुलद्वेषीस्वकुलद्वेषीपुनःपिशुनः।५।अतिमलिनेकर्तव्येभवतिखलानामतीवनि पुणाधीः
=नकुः= तिमिरेहिकौशिकानांरूपंप्रतिपद्यतेदृष्टिः।६एतेसुबंधोः।लब्धोच्छ्रायोनीचःप्रथमतरंस्वामिनंपराभवति।भूमिरजोरथ्या
दावुच्छापकमेवसंवृणुते।७एषखविष्णुगुप्तस्य।उपकृतमनेनसुहृदयमित्यसतामस्तिनककवित्पेक्षाहितःस्वहस्तामाश्रितमु
हतोग्निर्दहत्येव।८।विषमामलिनात्मानोद्विजिह्वाजिह्मगाइव।जगत्प्राणहरानित्यंकस्यनोद्वेजकाःखलाः।९हरिगण
स्य।दुर्जनःपरिहर्तव्योविद्ययालंकृतोपिहि।मणिनाभूषितःसर्पःकिमसौनभयंकरः।१०चाणक्यस्य।परिशुद्धामपिवृ
त्तिंसमाश्रितोदुर्जनःपरान्व्यथते।पवनाशिनोपिभुजगाःपरोपतापंनमुंचंति।११जीवःसमाश्रितोवश्यमनवाप्यपराश्रये।
छिद्रंनरतिमाप्नोतिदृष्टांतोत्रकटीरवः।१३खलानांकंटकानांचद्विविधैवप्रतिक्रिया।उपानन्मुखभंगोवादूरतोवाविवर्जनं।१४।सुमु
खोपिसुवृत्तोपिसन्मार्गपतितोपिसन्।सतांवैपादलग्नोपिव्यथयत्येवकंटकः।१५अपूर्वःकोपिकोपाग्निःसज्जनस्यखलस्यच।ए
कस्यशाम्यतिस्नेहाद्वर्धतेन्यस्यवारितः।१६निमित्तमुद्दिश्यहियःप्रकुप्यतिध्रुवंसतस्यापगमेप्रसीदति।अकारणद्वेषिमनो
स्तुयस्यकथंजनस्तंपरितोषयिष्यति।१७पादाहतोपिदृढदंडसमाहतोपियंदंष्ट्रयास्पृशतितंकिलहंतिसर्पः।हर्षादिवैषपिशु
नोग्रमनुष्यधर्माकर्णेपरंस्पृशतिहंत्यपरंसमूलं।१८।नौम्युदुर्जनजिह्वांचप्रतिकूलविसर्पिणीं।परप्रतारणायैवदारुणाकेननि

मिता॥१९॥यस्मिन्वंशे समुत्पन्नस्तमेव निजचेष्टितैः। दूषयत्यचिरेणैव घुणकीट इवाधमः॥२०॥प्रेरयति परमनार्यः शक्तिविहीनोपि
जगदभिद्रोहे। तेजयति शस्त्रधारां स्वयमसमर्था शिलाच्छेत्तुं॥२१॥स्वभावकठिनस्यास्य कृत्रिमं बिभ्रतोनतिं। गुणोपि परहिंसा
यै चापस्येव खलस्य वा॥२२॥अयःपिंड इवोत्तप्ते खलानां हृदये क्षणात्। पतिता एव नश्यंति गुणाः स्नेहकणा इव॥२३॥वर्जनीयो
मतिमता दुर्जनः सख्यवैरयोः। श्वा भवत्यपकाराय लिहन्नपि दशन्नपि॥२४॥वक्रतां बिभ्रतो यस्य गुह्यमेव प्रकाशते। कथं स्या खलः
न्न समानः स्यात्पुच्छेन पिशुनः शुनः॥२५॥शिरसि निहितोपि नित्यं यत्नादपि सेवितो बहुस्नेहैः। तरुणीकच इव नीचः कौ
हृति टिल्यं नैव विजहाति॥२६॥पात्रमपात्रीकुरुते दहति गुणं स्नेहमाशु नाशयति। अमले मलं नियच्छति दीपज्वालेव खलमैत्री॥
२७॥स्नेहेन भूतिदानेन कृतस्वच्छोपि दुर्जनः। दर्पणश्चांतिके तिष्ठन्करोत्येकमपि द्विधा॥२८॥यथा यथैव स्नेहेन भूयिष्ठमुप स्नेहेन भूति दानेन
चर्यते। धत्ते तथा तथा तापं महावैश्वानरः खलः॥२९॥स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं। अहो नु सदृशी वृत्ति
क्षापस्येव खलस्य वा स्तुलाकोटिः खलस्य च॥३०॥नैवात्मनो विनाशं गणयति पिशुनः परव्यसनहृष्टः। प्राप्य सहस्रविनाशं समरे नृत्यति क २०
बंध इव॥३१॥दूयमानाः स्तुतीच्छेन नीचाः परयशोग्निना। अशक्तास्तत्पदं गंतुं ततो निंदां प्रकुर्वते॥३२॥खलः सत्क्रियमा
णोपि ददाति कलहं सतां। दुग्धधौतोपि किं याति वायसः कलहंसतां॥३३॥केषामप्येतो न विषममृतं कर्तुं शक्यं प्र...श

...तवेव दूषणमिदं यन्नाम कस्तूरिका क्रीतारां तरसा विनिर्णतु दृष्टतां नानौ कृतामृत्यवो पश्येनां यदि दुर्जनस्य रसना कृंदे करिष्यत्तदा नाय
तवाल विघ्नदुत्तयं की निश्चिनि र्दिष्टिना॥१॥ कस्यापि॥ ...॥ कस्यापि॥

तेरपि त्यजति कटुतां। न न खलानिं बसिक्तोपि योद्विगुणपरिचिता मर्यं वाणी॥ न जल्पति दुर्जनश्चिरमपि बलाध्मातलोहो
ज्वलः कनकाकृतिः॥३४॥इति श्री० दुर्जननिंदापरिच्छेदः॥२३॥ ॥अथ कृपणनिंदा॥ यदर्जितं परिक्लेशैरर्जितं यन्न
भुज्यते। विभज्यते यदंतेन्यैः कस्यचिन्मास्तु तद्धनं॥१॥ यत्करोत्परितिक्लेशं यत्स्वामो मोहं प्रजागरोन तद्धनं कदर्याणां हृदय
वसुरहे व्याधिरेव सः॥२॥ क्लेशैर्दस्यो मृत्युः शरीरगो प्राप्तधनरक्षे वसुधरा दुश्चारिणीव हसति स्वपतिं पुत्रवत्सलं॥३॥ बाणन
कृस्यानंदनरेंद्र द्विषः दुष्कृतमिव किमपि विहितमतिघोरं। वसुधातलोभ्यपाको विरमति नाद्यापि यत्तेन॥४॥ वस्त्र
नदेव स्या गाढतरबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य। कृपणस्य कृपाणस्य च केवलमाकारतो भेदः॥५॥ गोनर्द
स्यात्कृपणसमृद्धीनामनिजोपकारः संति केचिदतिनिपुणाः। जलसंपदो नु राशेर्याति क्षारं सा च दौर्वाग्नेः॥६॥ प्राकार
वर्णस्यो प्रासादापि न लभ्यते तेन भोगार्थो कुंभ च कूर्मनि कृपणः। मुखपाक किल नवनिद्रा सा पाके बलिभुजां हि॥७॥ रविगु
प्तस्य। त्यागभोगविहीनेन धनेन धनिनो यदि। भवामः किं न तेनैव धनेन धनिनो वयं॥८॥ कस्यापि॥ कृपणेन समो दा
ता न भूतो न भविष्यति। अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति॥९॥ व्यासस्य॥ यो न ददाति न भुंक्ते सति विभवे नैव
चवस्य तद्द्रव्यो तृणमिव कृत्रिमपुरुषो रक्षति सस्यं परस्यार्थे॥१०॥ कस्यापि॥ कृपणेन शवेनेव मृतेनापि न दीयते॥

अदाता दात्प्रवरमविनीतैस्तिनयिनं कूपं रूपाढ्यं नृपशत जितं क्षिप्तजयिनं। अदो नूनमीशाभाम हमवदनाशापरवशो मृषा क्लेशो दोषो गुरुकं च विस्मयता वादिनि मयि॥ १४ क्रोश

मा संवर्धयता तेन काकस्योपकृतिः कृता॥ १० उदारचरितास्त्यागी याचितः कृपणो धिकः। एको धनं ततः प्राणा नान्यः प्राणास्त
तो धनं॥ ११ दानं भोगो नाशस्तिस्रो गतयो भवंति वित्तस्य। यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति।। १२ नोपभोक्तुमपि
क्लीबो जानात्युपचितां श्रियं। ग्राम्यो विरागयत्येव रमयन्नपि कामिनीं॥ १३ केषामप्येतौ। इति श्रा० कृपणनिंदापरिच्छे
दः॥ २३ ॥ अथ याचकनिंदा॥ देहीति वक्तुकामस्य यद्दुःखमुपजायते। दाता चेत्तद्विजानीयाद्द्याच्च पिशिताशनानपि
१। कस्यापि। वेपथुर्मलिनं वक्त्रं दीना वाग्गद्गदस्वरः। मरणे यानि चिह्नानि तानि चिह्नानि याचके॥ २ व्यासस्य। भ्रात
र्धातरशोषयाचकजनैर्वै राय से सर्वदा यस्मात् विक्रमशालिवाहनमहीभृन्मुंजभोजादयः। अल्पं ते चिरजीविनो न
विहिता स्ते विष्णुजीवा तवो मार्कंडकवलोमशप्रभृतयः सृष्टाः प्रभूतायुषः॥ ३ उड्डीशनाथगुणपत्रिणः सुखफला
न्याराद्वि[illegible] र्भैः पर्यस्तापरितो यशः स्तबकिताः संपल्लतापल्लवाः। प्रागेवापसृतः प्रमोद हरिणश्छाया कथा
सप २ तं गता दैन्यारब्ध मतंगजेन महता भग्ने निमानद्रुमे॥ ४॥ विद्यावतः कुलीनस्य धनं याचितुमिच्छतः। कंठे पाराव २१
तस्येव वाक्करोति गतागतं॥ ५॥ दक्षिणाशाप्रवृत्तस्य प्रसारितकरस्य च। तेजस्तेजस्विनोऽर्कस्य हीयते न्यस्य का
कथा॥ ६ गुरुता मुपयाति यन्मृतः पुरुषस्तद्विदितं मयाधुना। न तुला धवर्द्ध उर र्थिता न मृतेति तिष्ठति सा मनागपि॥ ७
वलिनाश॥

यद्यपि चरणौ पिनाकपाणिना तेनाप्ययुक्तौ कृतौ दण्डवत् अर्जुनेन बलिना दिग्धेद्भुमर्भूषितौ दग्धमरावणपालिता हनुमता दियाचलं का पुरी सरिद्धिजन दुःखकारि जि
केनापि दग्धं न तत्॥ १॥ अन्यतः॥ उत्थिता पृष्ठलग्नमेकमुद्दहसखेदारि प्राणारं मम श्वीत स्तावदहं हि राम्भरण जीमेवेच दीर्घसुखं। इच्छा क्रोधनवर्जितेन विदुषा गाचास्म शानेरा आदारिद्य
तृणं वरं वरमिति ध्यात्वेव वह्नौ स्थितः॥ ७॥ ७ उत्
साधुरेवार्थिभिर्याच्यः क्षीणवित्तोपि सर्वदा। शुष्कोपि हि नदीमार्गः खन्यते सलिलार्थिभिः॥ ८॥ तृणं लघु तृणात्तूलं तू
लादपि हि याचकः। वायुना किं न नीतोसौ मामपि प्रार्थयिष्यति॥ ए केषामप्येते॥ इति श्रा० याचकनिंदापरिच्छेदः
२४॥ ॥ अथ दरिद्रनिंदा॥ उत्पद्य हृदि लीयंते निर्धनानां मनोरथाः। बालवैधव्यदग्धानां कुलस्त्रीणां कुचाविव॥ १
कस्यापि। हे दारिद्र्य नमस्तुभ्यं सिद्धोहं त्वत्प्रसादतः। पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन॥ २ इह लोके हि धनि
नां परोपि स्वजनायते। स्वजनोपि दरिद्राणां तत्क्षणाद्दुर्जनायते॥ ३ कस्यापि। रोगी चिरप्रवासी परान्नभोजी परा
वसथशायी। यज्जीवति तन्मरणं यन्मरणं सोस्य विश्रामः॥ ४ परीत्यसत्कुलं विद्यां शीलं शौर्यं सुरूपतां। विधिर्ददाति
निपुणः कन्यामिव दरिद्रतां॥ ५॥ दरिद्रानलसंतापः शांतः संतोषवारिणा। याचकाशाविघातांतर्दाहः केनोप
शाम्यति॥ ६॥ अर्थानसंति न च मुंचति मां दुराशा दानात्र संकुचति दुर्ललितं मनो मे। यो याचलाघवकरी स्ववधेन
पापं प्राणाः स्वयं व्रजत किं प्रविलंबितेन॥ ७ माघकवेः। मा रोदीश्चिरमेहि वत्स रुचिरान्दृष्ट्वाद्य बालामि मो नाया
तस्तव वेश्म दास्यति पिता श्रेयः कवासः सी। क्वचैवं गृहिणी वचो सि निकटे कुड्यस्य निःकिंचनो निःश्वस्याश्रुजललघु
वासदर्द वच्य तमुरवं पांथः पुनः प्रस्थितः॥ ८॥ हंडी संडमिदं प्रयच्छ य दिवा स्वां केटहाणाम्नं किं रिक्तं नूतलमत्र नाथ सवतः प्र

दृष्ट्वा लालो ज्वयः। दंपत्योरिति जल्पितं निशि यदा चौरः प्रविष्टस्तदा लब्धं कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ॥९॥ दृ-
द्धानः पतिरेष मंचकगतः स्थूणावशेषं गृहं कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्तापि नो। यत्नात्संचिततैल-
बिंदुघटिका भग्नेति पर्याकुला दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति ॥१०॥ अंबा तुष्यति न मया न स्नुषया
सा च नांबया न मया। अहमपि न तया न तया वद राजन्कस्य दोषोयं ॥११॥ दरिद्रस्य दोषः। केषामप्येतौ। चंडाल-
श्च दरिद्रश्च द्वावेतौ सदृशौ विदुः। चंडालस्य न गृह्णंति दरिद्रो न प्रयच्छति ॥१२॥ श्रीवाल्मीकेः॥ इति शा० दरिद्रनिंदा
परिच्छेदः॥२५॥ ॥अथ मूर्खनिंदा॥ यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किं। लोचनाभ्यां विहीनस्य दर्पणः
किं करिष्यति ॥१॥ चाणाक्यस्य। वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहंति वा।
भवति च पुनर्भूयान्भेदः फलं प्रति तद्यथा प्रभवति शुचिर्बिंबोद्ग्राहे मणिर्न मृदां चयः ॥२॥ कालिदासस्य। लभेत सिकता-
सु तैलमपि यत्नतः पीडयन्पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः। कदाचिदपि पर्यटन् शशविषाणमासा- २२
दयेन्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥३॥ प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रांकुरात् समुद्रमपि संतरेत्प्रच-
लदूर्मिमालाकुलं। भुजंगमपि कोपितं शिरसि पुष्पवद्धारयेन्न तु प्र० ॥४॥ एते भर्तृहरेः। मूर्खो हि जल्पतां पुंसां श्रुत्वा

वाचः शुभाशुभाः। अशुभं वाक्यमादत्ते पुरीषमिव सूकरः ॥५॥ व्यासस्य। उपदेशो हि मूर्खाणां प्रकोपाय न शांतये। पयःपा-
नं भुजंगानां केवलं विषवर्धनं ॥६॥ चाणाक्यस्य। इति शा० मूर्खनिंदा ॥२६॥ ॥अथ तृष्णानिंदा॥ वलिभिर्मुखमाक्रांतं पलि-
तैरंकितं शिरः। गात्राणि शिथिलायंते तृष्णैका तरुणायते ॥१॥ भर्तृहरेः। तृष्णे देवि नमस्तुभ्यं धैर्यविप्लवकारिणि। विष्णुस्त्रै-
लोक्यनाथोऽपि यस्त्वया वामनीकृतः ॥२॥ कस्यापि। भ्रांतं याचनतत्परेण मनसा देहीति वाक्केरिता भुक्तं मानविवर्जितं प-
रगृहे निःशंकया काकवत्। साक्षेपं भ्रुकुटीकटाक्षकुटिलं दृष्टं खलानां मुखं तृष्णे देवि यदन्यदिच्छसि पुनस्तत्रापि स-
ज्जा वयं ॥३॥ कस्यापि। नास्त्यन्या तृष्णया तुल्या काचित्स्त्री सुभगाकृतिः। या प्राणानपि मुंचंती नित्यं वत्सेवाधिकं प्रिया
॥४॥ व्यक्ता दंताः सिताः केशा वाग्विरोधः पदे पदे। पातसज्जमिमं देहं तृष्णा साध्वी न मुंचति ॥५॥ तृष्णे यमपितृभ्रांधात्रिषु
रक्ता नेषु रज्यसे। व्याधितेष्वनपत्येषु जरापरिणतेषु च ॥६॥ धनेषु जीवितेष्वेषु स्त्रीषु भोजनवृत्तिषु। अतृप्ता मानवाः स-
र्वे याता यास्यंति यांति च ॥७॥ तृष्णे देवि नमस्तुभ्यं यया वंशं सर्वस्य सर्वदा। उत्पादयस्य यत्नेन गोपदे सागरभ्रमं ॥८॥ अपि मे- अ
रुपमं प्राज्ञमपि शूरमपि स्थिरं। तृणीकरोति तृष्णैका निमेषेण नरोत्तमं ॥९॥ केषामप्येतौ। इति शा० तृष्णानिंदा २७॥
अथ लोभनिंदा। लोभः सदा विचिंत्यो लुब्धेभ्यः सर्वतो भयं दृष्टं। कार्याकार्यविचारो लोभविमूढस्य नास्त्येव ॥१॥
अतिसाहसमतिदुष्करमत्याश्चर्यं च दानमर्थानां। योपि ददाति शरीरं न ददाति वित्तलोलेपि। केपि स्वभावलुब्धास्ति

॥ ॥ णे द्यूतजितेषु पार्थेषु दासीकृतेषु धृतराष्ट्रेण द्रौपदी प्रत्युक्ता अभिलषितं वरं वरयेति तेन वरं वरया एकेन युधिष्ठिरं द्वितीयेन भीमार्जुनौ नकुलसहदेवौ तृतीयं वरयेत्युक्ता द्रौपदी वक्ति धर्मस्य ॥ शायन गवन्नोहलुब्धे हे । अन हविरमादर्श इति तीर्थं राजसत्तम ॥ ॥ एकमाकुर्वर विरये वोदक्षिये वरोस्मृतो ॥ श्रद्देत्रयस्तु राज्ञे द्रव्यालुण स्याशतं वराः ॥ रा ॥ ५ ॥ जारता

स्त्रीव्रतरां यातनामपि सहंतो न तु संत्यजंति विनं मा सर्यमिवाधमाः सन्ततो ।३। भ्रमरदिवा तिलुब्धान्वंति र्घनलवण वा
रिबकृष्टमाः । तृणलवमिव निज देहं त्यजंति लेशं न वित्तस्य ।४। सत्यप्रशामतपोनिःसत्पधनैः शास्त्र वेदिनिर्विजितः ।
बडुः २ लोभो वपुः प्रविष्टः कुटिलं हृदयं किरातानां ।५। एतौ द्वेमे इस्पोना त्पर्थमर्थार्थिनया लुब्धमुद्वेजयेज्ज नीच भिर्दि
शाश्वरं स्त्री मथ्यमानोस्त्र जद्विषां ।६। प्रायेण धनिनामेव धनलोभो निरंतरो पश्य कोटिद्वयोपेतं लक्षाय प्रणतं
धनुः ।७। इति श्री० लोभ निंदा० ॥ अथ देवास्तौन ॥ ब्रह्मा येन कुलालवन्नियमितो ब्रह्मांड भांडोदरे रुद्रो ये
न कपाल पाणिपुटके भिक्षाटनं कारितः । विष्णु र्येन दशावतार गहने क्षिप्तः सदा संकटे सूर्यो भ्राम्यति
नित्यमेव गगने तस्मै नमः कर्मणे ।१। नमस्यामो देवान्ननु हत विधेस्तेपि वशगा विधिर्वंद्यः सोपि प्रतिनियतक
र्मैकफलदः फलं कर्मायत्तं यदि किममरैः किं च विधिना नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ।२। खल्वाटो
दिवसेश्वरस्य किरणैः संतापितो मस्तके वांछन्देशमनातपं विधिवशात् बिल्वस्य मूलं गतः । तत्राप्यस्य महाफले २३
न पतिता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनं ।३। मज्जत्वंभसि यातु मेरुशिखरं शा
त्रून् जयत्वाहवे वाणिज्यं कृषिसेवनादि सकला विद्याः कलाः शिक्षतु । आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं
परं नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ।४। एतेन हरेः । स्ववशः करोति कर्म प्रमदा [illegible] परवशो

कर्माणि जीवस्य सुखिनतामात्यस्य वश्यात्मनां कुर्यात् नेष्ठ लिता लता इव फलैर्नाभूतलम् जीविय ॥ अबिं लंघयती च निरवनय ताडवीन लं प्रेषितामन्येषां य वसाय सारस च तां न अ
त्रियकृ ज्यते ॥ ॥ उर ॥

भवति । स्ववशो रोहति वृक्षं निपतत्यवशस्ततः शुकवत् ।५। कस्यापि किंचन नवे त्रिजगति प्रख्यातं लाभ कारणे मूलं
विधिलिखिताक्षरमालं फलति कपालं न भूपालः ।६। द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोप्यंतात् आनी
य झटिति घटयति विधिरभिमतमभिमुखीभूतः ।७। भाग्यवंतं प्रसूयेथा मा शूरं मा च पंडितं । शूराश्च कृतविद्याश्च
वने तिष्ठंति पांडवाः ।८। गजभुजंगविहंगम बंधनं शशिदिवाकरयोर्ग्रहपीडनं मतिमतां च विलोक्य दरिद्रतां वि
धिरहो बलवानिति मे मतिः ।९। न केवलं मनुष्येषु देवं देवेष्वपि प्रभुः सति मित्रे धनाध्यक्षे चर्मप्रावरणो हरः ।१०। भ्रमो
भिः स्थलतां स्थले जलधितां धूलीलवः शैलतां मेरुर्मृत्कणतां तृणं कुलिशतां वज्रं तृणप्रायतां वह्निः शीतलतां हि
मं दहनतामायाति यस्येच्छया लीलादुर्ललिताद्भुतव्यसनिने दैवाय तस्मै नमः ।११। अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति । जीवत्यनाथोपि वने विसर्जितः कृतप्रयत्नोपि गृहे न जीवति ।१२। सच्छिद्रो मध्यकुटिलः क
र्णः स्वर्णस्य भाजनं । धिग्दैवं निर्मलं नेत्रं पात्रं कज्जलभस्मनः ।१३। दाता बलिः प्रार्थयिता च विष्णुर्दानं च भूर्वाजिम
खस्य कालः । नमोस्तु तस्मै भवितव्यतायै यस्याः फलं बंधनमेव जातं ।१४। केषामप्येते गगने तौ जगंत्येत्र सूर्यचंद्र
मसावपि पश्य गच्छतः । एवास्तं नियतिः केन लंघ्यते ।१५। इति कर्मः । प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।

उद्यमपरीतिकुशिष्टिरवा श्रीसंजयप्रतिज्ञतसैनमसैतं बाबालीहृद्वंवसैजयाउताबलं बलीयीसैक्षता प्रकृतने दशो॥१॥ उतबालायपांडियंपंउतायोतबालनो। दक्षा।
तेसर्वमीशानस्थप्रस्ताधुकुजहरत॥२॥ ३४
प्रपान

अवलंबनायदिनभर्तरभून्निपतिष्यतः करसहस्रमपि॥१६॥ माघकवेः॥ प्रियसखि विपद्दंडप्रांतप्रपरंपरापरिचयचले चिंता
चक्रे विधायविधिः खलः। मृदमिवबलात्पिंडीकृत्य प्रगल्भकुलालवद्भ्रमयतिमनोनोजानीमः किमत्रकरिष्यति॥१७॥
विज्जाकया॥ किं करोतिनरः प्राज्ञः शूरोवाप्यथपंडितः। दैवंयस्यफलच्छेदी करोतिविफलाः क्रियाः॥१८॥ यन्मनोरथश
तैरगोचरं नस्पृशंति कवयोगिरामपि। स्वप्नवृत्तिरपियत्रदुर्लभा लीलयैवविदधातितद्विधिः॥१९॥ इतिश्री० दैवाख्या
नपरिच्छेदः॥ ॥अथउद्यमाख्यानं॥ नदैवमितिसंचिंत्यत्यजेदुद्योगमात्मनः। अनुद्यमेनकस्तैलं तिलेभ्यः प्राप्तुमि
च्छति॥१॥ उद्योगिनं पुरुषसिंहमुपैतिलक्ष्मीर्दैवंहिदैवमिति कापुरुषावदंति। दैवंनिहत्यकुरुपौरुषमात्मशक्त्या यत्ने
कृतेयदिनसिध्यति कोत्रदोषः॥२॥ कुमित्रस्य॥ विहायपौरुषंयोहि दैवमेवावलंबते। प्रासादसिंहवत्तस्यमूर्ध्नि
तिष्ठंतिवायसाः॥३॥ उद्यमेनहिसिध्यंतिकार्याणिनमनोरथैः। नहिसुप्तस्यसिंहस्यप्रविशंतिमुखेमृगाः॥४॥ पूर्व
जन्मजनितंपुराविदः कर्मदैवमितिसंप्रचक्षते। उद्यमेनतदुपार्जितंचिराद्दैवमुद्यमवशान्नतत्कथं॥५॥ दैवंपुरुषकारे 24
णसाध्यसिद्धिनिबंधनं। आगच्छत्येवनेतयोपिपदमेकंनगच्छति॥६॥ काममप्रियमासाद्ययस्तद्दृष्टोनचेष्टते। तस्याप्स्य याति
पुनः श्रेयोबीजमोजिकूटंबवत्॥७॥ केषामप्यत्र॥ संपदासुस्थितंमन्येभवतिस्वल्पयापियः। कृतकृत्योविधिर्मन्येनव
र्धयतितस्यतां॥८॥ असंपादयतःकिंचिदर्थंजातिक्रियागुणैः। यदृच्छाशब्दवत्पुंसःसंज्ञायैजन्मकेवलं॥९॥ इतिश्री०

उद्यमाख्यानं॥ ॥अथप्रकीर्णकाख्यानं॥ दानायलक्ष्मीः सुकृतायविद्या चिंतापरब्रह्मविनिश्चयाय। परोपकारायवचां
सियस्यवंद्यस्त्रिलोकीतिलकः सएकः॥१॥ श्रीदेवगणदेवानां निष्कलंककलैकया। अपियःसंयुतःसखलुदृश्यतेजनैः
नद्दपत्रपजलज्जोपिधार्यतेशंकरेणशिरसानिशाकरः॥२॥ शार्ङ्गधरस्य॥ एतेसत्पुरुषाः परार्थघटकाः स्वार्थंपरित्य
ज्यये सामान्यास्तुपरार्थमुद्यमभृतः स्वार्थाविरोधेनये। तेमीमानुषराक्षसाः परहितंयैःस्वार्थतोहन्यते येतुघ्नंतिनिरर्थ
कंपरहितंते केनजानीमहे॥३॥ भर्तृहरेः॥ अन्यमुखेदुर्वादोयः प्रियवदनेसएवपरिहासः। इतरेंधनजन्मायोधूमःसोगुरु
भूवोधूपः॥४॥ गोवर्धनाचार्यस्य॥ अहोबतमहत्कष्टंविपरीतमिदंजगत्। येनापत्रपतेसाधुरसाधुस्तेनतुष्यति॥५॥
अदातापुरुषस्त्यागीधनंसंत्यज्यगच्छति। दातारंकृपणंमन्येमृतोप्यर्थंनमुंचति॥६॥ एतौव्यासस्य॥ दातव्यंभोक्तव्यंस
तिविभवेसंचयोनकर्तव्यः। पश्येहमधुकरीणांसंचितमर्थंहरंत्यन्ये॥७॥ अशठमलोभमजिह्मंत्यागिनमनुरागिणंवि
शेषज्ञं। यदिनश्रयतिनरंश्रीः श्रीरेवहिवंचितातत्र॥८॥ यावत्सयत्नि पद्मेपिसंध्यावधिविजृंभतेइंदिरामंदिरेन्येषांकथं
स्थास्यतिसाचिरं॥९॥ रक्षंतिकृपणाःपाणौद्रव्यंक्रव्यमिवात्मनः। तदेवसंतःसततमुत्सृजंतियथामलं॥१०॥ सद्विद्याय
दिकाचिंतावराकोदरपूरणे। शुकोप्यशनमाप्नोति हरेरामइतिब्रुवन्॥११॥ ददतोयुध्यमानस्यपठतःपुलकोनचेत्। आ
त्मनश्चपरेषांचधिक्त्यागंपौरुषंवचः॥१२॥ नतद्भुक्तंनतत्पीतंनतच्छ्रुतंनतत्कृतं। यन्मांसमहिषीशीरखलतावाजि

वर्जितो ॥१३॥ दुर्जनदूषितमनसां स्वजनेपि नास्ति विश्वासः । पाणिः पयसा दग्धो दध्यपि फूत्कृत्य नद्धयति ॥१४॥ करोति निर्म
लाधारा तु छस्यापि महार्घतां । अब्दस्य बिंदुरल्पोपि शुक्तौ मुक्ताफलं भवेत् ॥१५॥ अंतःकटुरपि लघुरपि सद्वृत्तं यः पुमान्न
संत्यजति । स भवति सद्यो वंद्यः सर्षप इव सर्वलोकस्य ॥१६॥ किमाद्यावैगुरुता न्यांचरमोपि गुणैर्गुरुः । केतकीकुसुमे
पत्रपलघुपत्रे गुणगौरवं ॥१७॥ पतितोपि राहुवदने तरणिर्बोधयति पद्मखंडानि । भवति विपद्यपि महतामंगीकृतवस्तु
निर्वाहः ॥१८॥ निःसारस्य पदार्थस्य प्रायेणाडंबरो महान् । न सुवर्णे ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते ॥१९॥ स एव धन्यो
विपदि स्वरूपं यो न मुंचति । त्यजत्यर्ककरैस्तप्तं हिमं देहं न शीततां ॥२०॥ मा स्मि मासि समाज्योत्स्नापक्षयोरुभयोरपि
तत्रैकः शुक्लपक्षोभूद्यशः पुण्यैरवाप्यते ॥२१॥ सौभाग्यं विरलस्यस्य समकर्मगुणेष्वपि । षड्विंशदायुधादंतः
खड्गाय तत्तैव कथ्यते ॥२२॥ हस्तादपि न दातव्यं गृहादपि न दीयते । परोपकरणार्थाय वचने पि दरिद्रता ॥२३॥ पतितोपि क
राघातैरुत्पतत्येव कंदुकः । प्रायेण हि सुवृत्तानामस्थायिन्यो विपत्तयः ॥२४॥ पदस्थितस्य पद्मस्य मित्रे वरुणभास्क २५
रौ । पदच्युतस्य तस्यैव क्लेददाहकरावुभौ ॥२५॥ व[illegible]दिह तोवकेः सरवाजवृतिमारुतः ॥ स एव दीपनाशाय कृशेक
स्यास्ति सौहृदं ॥२६॥ गतः स कालो यत्रासीद्दत्ताकल्पश स्विनां । उदुंबरफलेभ्योपि स्पृहयामोधुना वयं ॥२७॥ भो
ज्यं भोजनशक्तिश्च रतिशक्तिर्वरस्त्रियः । विभवे दानशक्तिश्च नाल्पस्य तपसः फलं ॥२८॥ व्यथयतितरामुपेतः स्वच्छप्र

कृतीन्व्यथ्यते योपि । दृशां शुद्धिं जनयते चक्षुः स कर्णे न रजसा कणेनापि ॥२९॥ शारदि समये निशाकरः शान हततिमिर कर१
संचया रजनी । जलदांतरिता कामपि दिवसच्छायां न पूरयति ॥३०॥ वरमुन्नतलीलासटाधूननं नीषणात्
सिंहात्पादप्रहारोपि न शृगालाधिरोहणं ॥३१॥ केषामप्येतौ ॥ इति शा० प्रकीर्णकाख्यानपरिच्छेदः ॥ ॥ ॥
अथ समस्यानां । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । दलितश्चकितः शून्नसवसे न्ये विसर्पति ॥१॥ सहस्रशी
= वयं वीरेश दाने = न इति श्लो ५ कस्यापि । का मे कामदुघे धुक्ष्व मित्रायवरुणाय वाः । सर्वान्कामान् शीमहि । इति त्रिपादसमस्या ॥२॥ असमाने स परद्वयं स
मानयंत्र विताकल्ह ममाद इति मथाक्रवंमानी मृगा सिंहः पलायते । कस्यापि । मृगात्सिंहः पलायते इति पदै
कं समस्या । विद्यायो दुर्मदो येषां कार्पण्यं विभवे सति । तेषां दैवाभिशप्तानां सलिलादग्निरुत्थितः ॥४ कस्यापि
सलिलादग्निरुत्थित इति पदैकं समस्या । दामोदरकराघात विह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेन शतचंद्रं नभस्त
लं ॥५ बाणस्य । शतचंद्रं नभस्तलमिति पदैकं समस्या । नीथश्री श्रृंकुसंतापश्रून्यरथ्यैतरस्तयोः । अन्योन्यालाप
सुखिनोर्दूनो ध्वंद्वायते रविः ॥६ दूनो ध्वंद्वायते रविरिति पदैकं समस्या । सीतासमागमोत्कंठाकर्णिताहृष्टध्वनि
नः । राघवस्य कराघातैः समुद्रादग्निरुत्पतत् । कं० । समुद्रादग्निरुत्पतत् इति पदैकं समस्या । स्वस्ति क्षत्रियदेवाय जग
गद्देवाय गृह्णते । यद्यशः पुंडरीकांतर्गगनं भ्रमरायते ॥८ गगनं भ्रमरायते इति पदैकं समस्या । यत्कंठे गरलं विराजति त

बा ङ्कुंबालंपोव लेकप्रकेर ति श्वित्राः

रांशीर्षेचमंदाकिनीउत्संगेचशिवामुखेकरितटेशार्दूलचर्मांबरंमायायस्यातनंरुणद्धिसकलंतस्मैनमःशंभवेजल
बज्जलबिंदुवज्जलजवज्जंबालवज्जालवत्॥९॥ कस्यापि॥ जंबूवज्जलबिंदुव॰ इतिपदैकसमस्या॥ कस्तूरीतिलकंललाट
रवितंनास्तामणिनिस्तलंवक्त्रंबर्बरकेशपाशामनिंद्रांदृष्टिंगिरिष्टौमुरः॥ पुंसांमानसमस्यबंधनविधौधमंत्रवसेत्वयं
जंबूवज्जलबिंदुवज्जलजवज्जंबालवज्जालवत्॥१०॥ गर्गान्वयसमुत्पन्नशार्ङ्गधरपंडितस्यसूनोःविश्वनाथकवेः॥ रथस्यै जोजदेवजल
कंचक्रंभुजगयमिताःसप्ततुरगानिरालंबोमार्गश्चरणरहितःसारथिरपि॥ रविर्गच्छत्यंतंप्रतिदिनमपारस्यनभसः
क्रियासिद्धिःसत्वेवसतिमहतांनोपकरणे॥११॥ क्रियासिद्धिं॰ इतिपदैकसमस्या॥ विजेतव्यालंकाचरणतरणीयोजल
लनिधिर्विपक्षःपौलस्त्योरणभुविसहायाश्चकपयः॥ तथाप्येकोरामःसकलमवधीद्राक्षसकुलं क्रियासिद्धिःसत्वे
वसतिमहतांनोपकरणे॥१२॥ कस्यापि॥ क्रियासि॰ इतिपदैकसमस्या॥ अस्माकंजलजीविनांजलमिदंसद्वाडिराद्धि
प्रत्तैःपातव्यंपररक्षकमनसोऽरतिःपतीनांस्वयः॥ मत्वैवंमहराजदेवनृपतेत्वत्क्षेत्रमात्रेऽस्यवेमक्षीरोदितिमाक्षिकास्ते २९
सतिध्यायंतिवामभुवः॥१३॥ श्रीअनंतदेवानां॥ मक्षीरोदितिमाक्षिकास्तहसंति इतिपदैकसमस्या॥ स्फुरितजठरेविस्मानं
वनीतभुजःशिशोः॥ माक्षिकापादघातेनकंपितंभुवनत्रयं॥१४॥ शार्ङ्गधरस्य॥ माक्षिकापा॰ इतिपदद्वयस्यसमस्या॥ रा
माभिषेकेमदविह्वलायाकरच्युतोहेमघटस्तरुण्याः॥ सोपानमासाद्यकरोतिशब्दंठंठंठंठंठंठंठंठंठंठंठः॥१५॥ कस्यापि॥

ठंठंठंठंठंठंठंठंठंठः॥ इतिपदैकसमस्या॥ उन्नमय्यसकचग्रहमास्यंचुंबतिप्रियतमेहठवृत्त्या॥ उंहुंउंहुंउंहुंउंहुंउंहुंउंहुंजिते
भवतिमानधनायाः॥१५॥ विज्जकायाः॥ उंहुंउंहुंउंहुंउंहुंउंहुंउंहूंजितंभवतिमानधनाया इतिपदैकसमस्या॥ प्रलयसह
थकभवतिगोलानाथम्पसकलभूमिरुहां॥ विलसतिदवदहनावलिरिहजलवाहःपरंशरणं॥१६॥ मुरारेः॥ हाथकराव
तिगोलानाथम्प इतिपदैकसमस्या॥ सुरतायनमस्तस्मैजगदानंदहेतवे॥ आनुषंगिफलंयस्यभोजराजनवाटशांग
सरस्वतीकुटुंबदुहितुः॥ सुरता॰वे इतिपदद्वयेसमस्या॥ अतसीपुष्पसंकाशंखवंवीक्ष्यजलदागमे॥ वियोगेपिजीवंति
नतेषांविद्यतेनयः॥१८॥ मेठस्या॥ अतसीपुष्पसं॰ नयः॥ इतिपदद्वयेसमस्या॥ कीर्तिःकुंतनिभाकपाटकठिनंवक्षस्थलंविद्वि
षास्थानीयंविजितंमनोरमगुणाकांतिर्मनोज्ञंवचः॥ श्रीमद्वीरमशोजनेत्रभवतःसर्वंक्रमाद्भूतलेगंगावज्जजगंडवङ्गनव
गांगेयवज्जेपवतां॥२०॥ शार्ङ्गधरपंडितस्यसूनोःविश्वनाथकवेः॥ गंगावज्जजगंडव॰ इतिपदैकसमस्या॥ मकरध्वजहणायपणीवृ
तंयदिनराघवतोप्यधिरोहति॥ सखितदेतदनूनममजीविलेशशकशृंगमयंकठिनंधनुः॥२१॥ कस्यापि॥ शशकशृंगमयेकठि
नेधनुइतिपदैकसमस्या॥ इति॰ शा॰ समस्याख्यानपरिच्छेदः॥७॥ ॥ अथप्रहेलिकापद्धतिः॥ हृद्याख्यानं॥ अपादोदूरगामी
वसाक्षरोनचपंडितः॥ अमुखःस्फुटवक्ताचयोजानातिसपंडितः॥१॥ कस्यापि॥ अत्रलेखपत्रंप्रकटीकृतं॥ वनेजातावनेत्यक्तं
वनेतिष्ठतिनित्यशः॥ पण्यस्त्रीनचसावेश्यायोजा॰॥ अत्रनौकाप्रकटीकृता॥ गोपालोनैवगोपालःत्रिशूलीनैवशंकरः॥ चक्रपा

णिः सनो विस्मुर्योज्ञा ॥३॥ अत्र महोद्या प्रकटीकृतः॥ उच्छिष्टे शिवनिर्माल्यं वमनं शावकर्पटं। काकविष्ठासमुत्पन्नापंचैते तिपवि
त्रिता॥ उच्छिष्टं दुग्धं॥ शिवनिर्माल्यं गंगा॥ वमनं मधुः॥ शावकर्पटं पट्टांबरो॥ काकविष्ठासमुत्पन्नाः पिप्पलादयः इति प्रकटीकृ लग्नाङ्गिनेबार
तः॥ विजिता त्मनवद्वेषि गुरुपाद हतोजनः॥ हिमापहामित्रधरैर्व्याप्तं व्योमाभिनंदति॥ दंडिनः॥ विनागरुडेन जितः इंद्रः॥ तदा
त्मनवः अर्जुनः॥ तद्वेषी कर्णः॥ तद्गुरुः सूर्यः॥ तत्पादहतः तत्किरणसंतप्तः॥ हिमापहा अग्निः॥ तदमित्रं पानीयं॥ तद्धरा मेघा
इति प्रकटीकृतं॥ काचिन्मृगाक्षी प्रियविप्रयोगे गंडेन निशापारमपारयंती॥ उद्धातुमादाय करेण वीणां सुग्रीवमालोक्य
रानेरहासीत्॥ ६॥ कस्यापि॥ वीणां किमर्थमहासीत्॥ यतो येगीतप्रियो मृगो मदुक्तं गीतमाकर्ण्य वितततद्दैवं तदासंद्रो नि दैद्राल्गिःस्वरेत
ष्कलंकस्यात्॥ मन्मुखसाम्यं चलन्नतो॥ प्रियविप्रयोगे संतापकरो मे हिमांशुः॥ अतोस्य रात्रौ श्चंद्रमसो मन्मुखसाम्यं मा भू
यात्॥ इति वीणा महासीत्॥ इति प्रकटीकृतो प्यर्थः॥ तरुण्यालिंगितः कंठे नितंबस्थलमाश्रितः॥ गुरूणां संनिधानेपि कः कूज
ति मुहुर्मुहुः॥ ७ धर्मदासस्य॥ अत्र कलशः प्रकटीकृतः॥ अवलोक्य स्तनौ बध्वा गुंजाफल विभूषणौ॥ निःश्वस्य रोदितुं लग्ना कुतो व्या २७
=त्रप३ धकुटुंबिनी॥ ८॥ शाबरस्त्रीकुचौ स्वाः स्तनौ गुंजाफलालंकृतौ दृष्ट्वा कुतो निःश्वस्य रोद॥ यतो मत्पुत्रैरेतामधुरक स्तथाक्षीण
तां गतः॥ यथा गजान्विनिहत्य गजमुक्ताफलहारैः स्तनौ विभूषयितुं नालं॥ अतो निःप्रयासग्राह्यैर्गुंजाफलैर्विभूषयति॥ पु
त्रेक्षीणे सति तद्दर्शितं निर्वाह वृत्तेः सर्वस्यापि कुटुंबस्य जीवितसंदेहः॥ अतो व्याधकुटुंबिनी दुःखान्निःश्वस्य रोदितुं लग्ना॥ इति
२७

प्रकटीकृतोयमर्थः॥ गीत्वा किमपि व्याधः शृंगं जग्राह तरुणहरिणस्यातम [illegible] समीक्ष्योद्यतकरमेणीमपि लज्जिता व्याधी॥ ९॥
शार्ङ्गधरस्य॥ अस्यार्थः॥ व्याधः किमप्यद्भुतं गीतं गीत मूर्छना विलीन चित्तस्य तरुणहरिणस्य शृंगं जग्राह॥ किमर्थं॥ यतो म
द्गीत सुखितस्त्वं याचकस्य मे इदं शिरो दानं देहि॥ अथ तं हरिणं शिरोदानाय उद्यतकरं समीक्ष्य तत्कायां हरिणी पत्युर्नत्वार
उदित निजशिरोदानाय निजकरां समीक्ष्य व्याधसार्थचारिणी व्याधिः लज्जिता॥ केन हेतुना लज्जितायतः अहं हरिणो दाता॥ इयं
हरिणी पतिव्रता दाता उर्वीया॥ मत्कांतो याचकः॥ अहं याचक जाया॥ वरमेते पशवो न वयं मनुष्या इति लज्जिता॥ अयं प्रथमोर्थः॥
अथवा व्याधजायायाः पत्नीतः पुरुषो मृतः सन विद्यमान संग्रहीतो द्वितीयः पुरुषः तं विलोक्य चिंतितवती॥ यतो निजकांत वियोगा
सहिष्णुः शिरोदानायोद्यतकरा पतिव्रता सती वरमियं हरिणीः परिणित प्रियः मरणेपि जीवितासंगृहीतमन्यकाचश्च सती नाहं मानुषी
इति लज्जिता॥ इति द्वितीयोर्थः॥ अथवा इति चिंतितं तया यतो येन कर्णेन गीतं श्रुतं तस्य दातुः कर्णस्य पुरो यां व्याये करो न प्रसारितो व्याधे
ना नीरस कठिनकृतिकस्य शृंगस्य पुरः करः प्रसारितः अनुचितं कृतं मूढेना कृतेप्यनुचिते अकृतन पात्रे विनारोगी तरसतः स्वनाव कृपण
जाचकं जानन्मृगः स्वपतिर्निजशिरोदानाय उद्यतकरो जातः॥ अतो व्याधी तं हरिणं च दूरं कृत्वा तं च व्याधं मूर्खं ज्ञात्वा एणीवद्दृष्ट्वा
लज्जिता॥ इति तृतीयोर्थः॥ इति प्रहेलिका॥ ॥ अथापकृतिः॥ रुचिरस्वर वर्णपदा सारस नावती जगन्मोह यति॥ तत्किं तरुणीन रा
हिं नहि वाणी बाणस्य मधुरशीलस्य॥ १ सीत्कारं सिंजयति व्रणं स्पधरं तनोति रोमांचं॥ नागरिकः किमु मिलितो नहि नहि सखि हेम

॥गेयः॥ ललितालुसरलातन्वीलुदंशो रुवागोरीस्पर्शस्तु रवाव हा गुणवतीनित्यंमनोहारिणी॥ सा केनापि कृतान तयाविरहितो गेतुं न शक्तो म्यहं रोमितो तव
= मिनीन हि न हि प्राणप्रियायष्टिका॥१॥ कस्यापि॥ कांते न कुपिते पापास्त म शर्नैन्यकाकृथायो भितां दूरादेवमयाक्रिताष्ठ सुरत्नयः स्रगंधधूपा द्यः॥रागं रागिणि मुं नमस्या
= नेदहे प्रसी दाधुनास घस्त्व हिरहारुवंति दयितेम सभिमां धा दिशः॥१॥ विक्रमस्य॥ शशिकलां वदति कवो राजनि कृने दं तु मुघ नेराजन्नेत्रपो रुच्यते स्म प पद्मु तिरर्लंकारः॥
नःपवनः॥२धर्मदासस्यैतो वर्षति मेघे नितरां म पतित याने व शवयनेस्था तुं॥उत्कंठितासि तरलेन हि न हि सखि पिच्छलः पंथाः॥३
कस्यापि॥ इत्यपन्हुतिः॥ ॥अथ कूटाः॥ केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः॥रुदंति कौरवाः सर्वे हा हा केशव केशव॥१॥ को
जले शवं मृतकं। द्रोणः कृष्ण काकः। कौरवाः शृगालाः॥ इतिसुबोधमेतत्पद्यं॥ अंबरमंबुनिपत्रमराति पीतमहीनगणस्य च दा
हा यस्याव धूस्तनयं ग्रहमद्रापातु सवो हरलोचन वह्निः॥२॥ दुराचयः स कृष्णः वो युष्मान्पातु॥ यस्य अंबरपीतं॥ यस्य गृहं अंबुनि
यस्य पत्रं अहीनगणस्य अरातिः॥ यस्य वधूः अद्रा यस्य तनयं हरलोचनवह्निः द्दग्धा॥इतिसुबोधमेतत्पद्यं॥ लक्ष्मीर्यादोनिधे
र्यादो नादो वा दोचितं वचः॥ विभ्यतीधीवरेभ्यो याऊ यथैव निमज्जति॥३ लक्ष्मी यादोनिधेः समुद्रस्य यादः ऊलजंतु अदो
बवः दा दोचितं॥ नो यतो धीवरेभ्यो विचक्षणेभ्यो बिभ्यती त्रस्यंती जने बकद्वये घ व निमज्जति तिष्टति॥ इतिसुबोधमेत
त्पद्यं॥ पानीयं पातुमिच्छामि त्वत्तः कमललोचने॥ यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहं॥४ कस्यापि॥ यदि दासी अ
सि नेच्छामि॥ नो दासी असि पिबामि अहं॥ इतिसुबोधमेतत्पद्यं॥ नदीजलं केशव नारिकेतुर्नगाह्वयो नामनगारिसूनुः॥ २८
एषोंगनावेषधरः प्रमाथी जित्वा वयं नेष्यति गाधगावः॥५॥ बालनारतस्या नाम नो नदी जलं भीष्मः॥ एष दृश्यमानः अंगना
वेषधरः स्त्रीरूपधारी॥ केशवनारिकेतुः वानरध्वजः॥ नगाह्वय अर्जुन नामा यतः किंभूतः॥ नगारिसूनुः इंद्रपुत्रः॥ नोः
कौरवाः अयं प्रमाथी हंता॥ अद्य वो युष्मान् जित्वा गावः नेष्यति॥ इतिसुबोधमेतत्पद्यं॥ चंचद्द्वादशनीलनीरजयुतं स प्तां
= पश्यद्यो क्षान्त्रि उरदह नैश्च पदं पल्लवं ड स्तु प्राप्य ह्रदं तु जगवलयं पर्वते राजहंसा॥४॥ नारीविशालु पतिधरं जायते च वल्लभ्यां द्विं दं वन्ध्या ४ प्रणमति हरे नीलाणी या कन्देल
= कस्यापि॥१॥ अयं श्लोक ४ वसुनिःपादे ४ आदि पदानुक्रमतः ४ व्याख्या समंजसा न वति॥ इति दुरन्वयः॥ नुत॥

भुजो द्भासितं नित्यं षोडशशोणपद्मरुचिरं धात्रा निशं सेवितो क्षीरांभोधि गृहं सहस्रदलसत्पर्यंकविश्रांतियत्पायाद्वः कमलां
गसंगिशयनं तन्नीलरोचिर्महः॥॥ शार्ङ्गधरस्य॥ अस्य व्याख्या॥ तन्नीलरोचिः श्यामप्रभां महः तेजः कृष्णलक्षणं वो युष्मान् पायात् = लं २
त्॥ पुनः किंभूतं कमलांगसंगिशयनं लक्ष्मीसनाथशय्यां॥ पुनः किंभूतं सहस्रदलसत्पर्यंकविश्रांतिसहस्रफणदिव्यशयन
शेषस्थितं॥ पुनः किंभूतं॥ क्षीरांभोधिगृहं दुग्धसमुद्रनिवासं॥ पुनः किंभूतं॥ धात्रा नाभीसरोरुहस्थेन ब्रह्मणा अनिशं सेवितं
अध्यासितं॥ पुनः किंभूतं॥ षोडशशोणपद्मरुचिरं षोडशारुण कमलमनोहरं॥ षोडशशोणपद्मा नो विहृतिः॥ चत्वारो हस्ता
चद्वौ चरणौ विष्णोः तावंत एव ब्रह्मणः॥ द्वौ करौ द्वौ चरणौ लक्ष्म्याः॥ एवं षोडशशोणपद्मरुचिरं॥ पुनः किंभूतं॥ नित्यं अविनाशिनं
पुनः किंभूतं॥ सप्तांबुजोद्भासितं॥ सप्तकमलशोभितं॥ सप्तांबुजानां विहृतिः॥ चत्वारि मुखानि ब्रह्मणः॥ एकं नाभिसरोरुहं
एकं विष्णोर्मुखं॥ एकं लक्ष्म्या मुखं॥ एवं सप्तांबुजोद्भासितं॥ पुनः किंभूतं॥ चंचद्द्वादशनीलनीरजपुंजं शोभमानं द्वादशनी
लोत्पलयुक्तं॥ द्वादशनीलनीरजानां विहृतिः॥ अष्टौ नयनानि ब्रह्मणः॥ द्वे विष्णोः द्वे लक्ष्म्याः॥ एवं चंचद्द्वादशनीलनीरजयुतं॥ अ
त्र अद्भुतिरलंकारः॥ इतिसुबोधमेतत्पद्यं॥ विकसितनयनाभ्यां कौरवं पंकजं च श्लथयति चरणाब्जं ब्रह्मचर्यं पयोधेः॥ उरसि
लसति यस्य श्रेयसां संप्रदायः स फणिनमधिशेते पद्मया पद्मनाभः॥१॥ अनिराम पश्वप तेः॥ अस्य व्याख्या॥ स पद्मनाभः पद्म
या सह फणिनं शेषं अधिशेते॥ यस्य नयनाभ्यां चंद्रसूर्यलक्षणाभ्यां कैरवं पंकजं च विकसति॥ यस्य चरणाब्जं गंगाजनकं प

योधः ब्रह्मचर्यं श्लथयति दूरीकरोति। यस्य उरसि श्रियः सांप्रदायः कौस्तुभमणिर्लसति। एवंविधः पद्मनाभः फणिनं अधि
शेते। अत्रापह्नुतिरलंकारः। इति सुबोधमेतत्पद्यं॥ इति शा॰ प्रहेलिकापह्नुतिकूटाख्यानपरिच्छेदः॥ ॥अथ क्रियागु
प्तकर्तृगुप्तकर्मगुप्तसंधिगुप्तबिंदुमतीचित्रभाषाचित्राख्यानो। आगतः पांडवाः सर्वे दुर्योधनसमीहया। तस्मै गां च सु
वर्णं च रत्नानि विविधानि च॥१॥ कस्यापि। यः धनसमीहया आगतः तस्मै सर्वे पांडवाः गां सुवर्णं च रत्नानि विविधानि च
अडुः ददति स्म। इति क्रियागुप्तं। गौरीनरवरसा दृश्यं श्रद्धया शशिनंदनः। इहैव गोप्यते कर्ता वर्षेणापि न लभ्यते॥२॥ शङ्का
मः तं हंतीति शङ्कहा ईश्वरः। अत्र कर्तृगुप्तं॥ अन्नवस्त्रसुवर्णानि रत्नानि विविधानि च। ब्राह्मणेभ्यो नदीतीरे ददाति ब्रजसंचरो॥३॥ हे ब्रा २९
ह्मणाः भ्यः सष्टहः। अत्र कर्मगुप्तं॥ एहि हे रमणि पश्य कौतुकं धूलिधूसरतनुं दिगंबरं। सापि तद्वदनपंकजं पपौ भ्रातकं कमपि
किं न बुध्यसे॥४॥ कस्यापि। कौ पृथिव्यां कौतुकं बालकं॥ इति कर्मगुप्तकं॥ पिबतस्ते शरावेण वारि कल्हारशीतलं। केनैतौ
दुर्विदग्धेन हृदये संनिरोपितौ॥५॥ शरौ बाणौ। एणं हरिणः। इति संधिगुप्तकं॥ वटवृक्षो महानेष मार्गमाहत्य तिष्ठति। २९
च तावद्वयं यान गंतव्यं यावद्वायत्र गच्छति॥६॥ कस्यापि। बटो ब्राह्मण स्तब्धन [illegible]कः। इत्यपि संधिगुप्तकं॥ नमयागो रसाज्ञिज्ञं
वेतः कस्मान्न जल्पति। अस्थानरुदितैरेभिरलमालोहितेक्षणे॥७॥ दंडिनः। नानिषेधो मिमम। आगो रसाज्ञि ज्ञं अपरा
धरसज्ञा इत्यपि संधिगुप्तकं॥ ॥अथ बिंदुमती॥ त्रिनयनचूडारत्नं मित्रं सिंधोः कुमुद्वतीदयितः। अयमुदयति द्यु

म्नमणिः पूर्णस्त्रणीवदनोपमश्चंद्रः॥८॥ [illegible] इति बिंदु
मती॥ ॥अथ चित्रं॥ विश्वस्य हेतुरमरैर्बहुगीयमेयं विश्वं नवेशाचरत्रि वे त्रिगुणात्मकं [illegible] विद्यो मतोपि परमां प्रथमं वदंति।
यं योगिनस्तुतिपराः प्रणिधानदृष्ट्या॥९॥ शार्ङ्गधरस्य। अस्य वसंततिलकाछंदसो दुर्गास्तुति रूपस्य पद्यस्य चतुर्णामि
पि पदानां षष्ठसप्तमाष्टमाक्षरलोपेन इंद्रवज्रावृत्तं शिवस्तुतिश्च जायते। नमामि मामनोनुन्नमानं मुनिममानिनं। नानान
नममानाममभिमानामुमेनं मुं॥१०॥ शार्ङ्गधरस्य। नमामि नमस्करोमि। कं उं विष्णुं न केवलं उं विष्णुं उमेनं पार्वतीनाथं हरिह
रमित्यर्थः। किंभूतं मामनोनुन्नमानं। मा लक्ष्मीः तस्याः मनसः नुन्नः अपहृतः मानो येन स तथा तं। लक्ष्मीचांचल्यगर्वापहर
णं। पुनः किंभूतं मुनिं योगीश्वरं। पुनः किंभूतं अमानिनं। नास्ति मानो यस्य सो तं॥ पुनः किंभूतं नानाननं। नानाविधानि आ
ननानि मुखानि यस्य सो तं। दशावतारवादनेकविधमुखं। पुनः किंभूतं। अमानामं। अमानं अकाशं अमतिक्रमतीति अ
मानामस्तं। पुनः किंभूतं। नामानं ब्रह्मस्वरूपं। एवंविधं उं उमेनं हरिहरं नमामि। द्विस्वरः। तारतारतरैरेतैरुत्तरोत्तरतो रुतैः।
रतार्त्रीति त्रिरीरोति तीरे तीरे तरौ तरौ॥११॥ द्विस्वरः। कालिदासकवेः। नागविशेषशेषशेषशेषैर्हृतेजगति। हंसपस्तिकाले पसं३
काले काले कालेघने स्तुतिर्नवर्त्तिं॥१२॥ देवेश्वरस्य सानुप्रासः लीलास्मितेन शुचिना मृदुनोदितेन व्यालोकितेन लघुना
गुरुणा गतेन। व्याजृंभितेन जघनेन च दर्शितेन सा हंति तेन गलितं मम जीवितेन॥१३॥ दंडिनः। सानुप्रासः। मधुरया मधु

बोधितमाधवीमधुसमृद्धिसमेधितमेधया॥मधुकरांगनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥१४॥ माघकवेः॥ कठि
नानुप्राससहितं॥ चतुर्थपदोत्तयमकं॥ आम्नायानामाहांत्या वाग्गी॥ तीनीती नीती प्रीती॥ नोगोरोगोमोदोमोहो॥ ध्येये वेछे
द्धे मे देशे॥१५॥ दंडिनः॥ चतुर्मात्रिकं॥ विद्युन्मालाछंदः॥ अस्या व्याख्या॥ आम्नायानां वेदानां अंत्या वाक् उपनिषत् आह कथय
त्। किं आहानीती ईती प्रीती नीती। नोगः रोगः मोदः मोहः॥ क्वे मे वसुनेदेशे आत्मा परमात्मना ध्येये इच्छे दितिचित्रालि॥ ॥
अथ नामचित्रं॥ उत्संगकंडितोरुकटारीनाजिराउत्तुंगनयंकरमालाः॥ सेउपायकगणाजयतौस्त्वं गाणगोहरमिलोदूवा
ली॥ कस्यापि॥ अस्या व्याख्या॥ हे राजन् त्वपायकलोकगणाः सेवकाः॥ उत्संगकंडितोरकटारीनाजिराः सन्॥ उत्संगा
न्निमुदिताः कलितोरुकटाः सज्जितस्थूलकपोलाः ये अरीणां शत्रूणां गजाः तेषां यो सो आजिः संग्रामः तैरीतिदर्दितिति उत्सं
गकलितोरुकटारीनाजिराः॥ उत्तुंगयंकरमालाः नुरुटीनीषणललाटाः सं ढौतेः पायकगणेः इलावः स्थूरस्कंधः इवा
ली जितकंदर्प स्वेअंगो हरेअंगो ग्रहं यथास्यात्तथा एवं तो दृष्टी जयोपरदेशा नरआलीयां रूपो॥ नूनं वादलछाहरवेह पसरी ३०
निशाणशद्दखरः शद्दु पांडिलुटालितो टिहणि सौ एवं नणंतुरुटी कूटेगर्वघराम घालिसहसारे कंतमेरे कहि
कंठेपाग निवेशराजा हशरणंश्रीमल्लदेवप्रभुं॥१७॥ श्रीकंठपंडितस्य॥ इति नामचित्रं॥ इति श्री क्रियागुप्तकर्तृगुप्तकर्मगुप्त
संधिगुप्तबिंदुमतीचित्रनामचित्राख्यानपरिच्छेदः॥ ॥अथ प्रश्नोत्तराख्यानं॥ तेषु अंतरालापाः॥ गच्छतिकाजिवक्रोड

तनिजतनवः का जिनत्रिस्वक्कलेकिंस्याद्योब्यंविकल्पेकककचनित्तनरवैःकिंनृसिंहेनभिन्नो॥ कीदृक्स्त्याः प्रस्तुतिः किमनल
- कलुखैर शमनं कान्नृपैः पालनीया। को वैद्यः कः प्रमाष्टि त्रिभुवनकलिलं स्वर्धुनीवारिपूरः॥ कस्यापि॥ स्वः॥ धुनी॥ वा॥ रि॥ पूरः॥ पुनर
पि अनुलोमेन॥ स्वधुनी॥ वारि॥ हः॥ अः॥ पुनरपि सर्वं॥ स्वर्धुनीवारिपूरः॥ पुंसः संबोधने किं विदधति किरणाः केभ्यो नि
षक्तिः का मूर्च्छाते रिपूणां नरवरनरकं को वधीद्दो वकंकिं॥ के वा वर्षासु नस्युर्बिसमिव हरिणा किं नखाग्रे विभिन्नं को वामा
र्गविसर्पन्नविघट्टयति तरूत्नर्मदावारिपूरः॥ नः॥ मदा॥ वारि॥ पूरः॥ पुनरप्यनुलोमेन॥ नर्मदावारिपूरः॥ पुनः सर्वं॥ नर्मदावा
रिपूरः॥ केभूषयंति स्तनमंडलानि कीदृग्युमाचंद्रमसः कृतःश्रीः॥ किमाहसीता दशकंठनीतां हारामहादेवरतातमातः॥ उ॥
हाराः॥ महादेवरता॥ तमातः॥ पुनः सर्वं॥ हारामहादेवरतातमातः॥ रवेः कवेः किं समरस्य सारं कृषेर्भयं किंप्रमुखं वितिष्ठंगाः॥ ख
ला इयं विष्णुपदे च केषां भागीरथीतीरसमाश्रितानां॥ भाः॥ गीः॥ रथी॥ इतिः॥ रसं॥ आश्रितानां॥ पुनः सर्वं॥ भागीरथीतीरसमा
श्रितानां॥ कः प्रार्थ्यते मदनविह्वलया युवत्या नातिक्षुद्रकमपेति कथं बतायुः॥ कानादरो भवति केन विराजते कैबा
ला स्त्रिः किं फलमुदाहर नालिकेरं॥५॥ ना॥ अलिके॥ अरं॥ पुनः प्रतिलोमेन॥ रंके॥ अलिना॥ पुनः सर्वं॥ नालिकेरं॥ कस्य
मरौ दुरधिगमः कः कमले कथय विरचितावासः॥ कौ स्तुष्पति चामुंडारिपवस्त्वे वद कृतो भ्रष्टाः॥ धर्मदासस्य॥ आयुष्कर
जातिः॥ कस्य जलं बस्या कः भ्रमरः के शिरोभिः कृतः पृथिव्याः॥ नलिनीदलगतजललवतरलं किंयौवनं धनमथायुः॥

समप्रीघ्नोस्थितम ४ कस्तस्यकोनिजं राज्ञ ८ कीर्ति ८ तिकरंग शावनयनाराजो हितायेदक्षः ४ विश्वंकः ४ युजते लिमोदनिवहं किंको त्रशम्भ इतिमं त्रश्नो त्तरम
= एदेकिंस्यात्तदाशीर्वचिः ८ ॥१३॥ कस्यापि ॥ सुराचिः ॥ द्विजयः ४ ॥ अमराः ४ वह्नत्वैर्मिसविवः ४ ॥ विरं ॥ दिनराजीवं ॥ पवनः ४ ॥ इति बाह्यालापपद्यं ॥ ॥ छ ॥ अन्यग्रंथात्

= करके राज्ञा धरैनिकरानुकारिणः सज्जनाए वा ७ कस्यापि ॥ किंक्रूरं स्त्रीहृदयं किं हितः प्रियहितायदारगुणः ॥ कः कामः संकल्पः
किंदुःकरं साधने प्रज्ञा ॥ ८ ॥ दंडिनः ॥ अथ प्रश्नोत्तरे बाह्यालापाः ॥ नीवेश्ययावनीवाणीकाकः स्पात्सु मंदो जने ॥ शोभो
रावरणं किं कंजते तौ व्याधयो नरा ९ ॥ श्रीहरिहरदेवानां ॥ प्रश्नोत्तरे किं ॥ अवेलानोऽज्जिनो अबेलोनः ॥ अञ्जिनो पुनः स
र्वं अवेलानोऽजनो ॥ कस्मिन् स्वपिति के सारिः का वृत्तिरधमाहृणां ॥ किंभूते पितरं बालः किंदृष्ट्वा रमते मनः ॥ १० ॥ प्रश्नस्यो
त्तरं किं ॥ शेषे सेवा वा परस्त्री ॥ शेषा सेवा ॥ बा ॥ परस्त्री ॥ अथ प्रश्नोत्तरेषु उक्तिप्रत्युक्तयः ॥ कियन्मात्रे जले विप्र जानुद
घ्नं नराधिप ॥ तथापीयमवस्था ते न हि सर्वत्र वादृशाः ॥ ११ ॥ प्रथमे पदे तृतीयपदे च नदी मुत्तितीर्षोर्भोजराजस्योक्तिः
द्वितीयपदे चतुर्थपदे च राजदर्शनार्थं छ काष्ठभार वहपंडितस्य प्रत्युक्तिः ॥ भूरिभारभराक्रांत बाधति स्कंध एष
ते न तथा बाधते स्कंधो यथा बाधति बाधते ॥ १२ ॥ पूर्वार्द्धं मृगयायाम् गृहमागच्छतः शिबिकारूढस्य भोजस्य उक्तिः ॥ उ
त्तरार्द्धं च राजदर्शनार्थं [illegible] शिबिकावाहक पंडितस्य प्रत्युक्तिः ॥ यदेतच्चंद्रांतर्जलदलवलीलां वितनुते तदाचष्टे
लोकः शशक इति नो मां प्रति तथा ॥ अहं त्विंदुं मन्ये त्वदरिविरहाक्रांततरुणीकटाक्षोल्कापातव्रणकिणकलंकांकि
ततनुं ॥ १३ ॥ पूर्वार्द्धं रात्रौ चंद्रमसो वर्णयतो भोजराजस्य ॥ उत्तरार्द्धं च राजदर्शनार्थं छ चौरपंडितस्यो इदमनुचित 32
मक्रमश्च पुंसां यदिह जरास्वपि मान्मथो विकारः ॥ इदमपि च न कृतं नितंबिनीनां स्तनपतनावधि जीवितं रतं वा ॥ १४ ॥ पूर्वा

र्द्धं तते निर्भोजस्य जो तेन विमाने ना उ गारिकृष्ट दानाप्युकुल्योऽमाय्यः श्रीविक्रमस्य पुण्यपत्रं स्थापितिनत्र पुण्यपत्रे प्रथमतो दृष्टवानेवं दत्तं ॥ छ ॥ स्वच्छ मकन वितर्वस्त्र
= राजजलेया वितेमागधः ४ प्राह ॥ वक्रो भोजे सरस्वत्यधिवसति ॥ छ ॥ प्रश्ना दृष्टो हाटककोटवइति ॥ छ ॥

र्द्धं सारिक्रीडौ कुर्वत्याः शीलाग्रहारिकायाः ॥ उत्तरार्द्धं च भोजराजस्य ॥ अक्षो हाटककोटस्य त्रिनवृतिर्मुक्ताफलानां तुला
= अन्यानामयुक्ते २ पंचाशन्मदगंधलुब्धमधुपक्रोधोद्धुराः सिंधुराः ॥ लावण्योपचयप्रपंचचतुरं पण्यांगनानां शतं दंडे पांड्यनृपेण ढौकितमि = ३३
दं वैतालिकायार्पय ॥ १५ ॥ निखिलमपि प्रविज्ञापयतो भांडागारिकस्योक्तिः ॥ वैतालिकायार्पयेति च सप्तसु दशराणि वै
तालिकगीतदत्तकर्ण विक्रमादित्यस्य प्रत्युक्तिः ॥ अलमतिचपलत्वात्स्वप्नमायोपमत्वात् परिणतिविरसत्वात् संग
मेन प्रियायाः ॥ इति यदि शतकृत्वस्तत्त्वमालोकयाम स्तदपि न हरिणाक्षीं विस्मरत्यंतरात्मा ॥ १६ ॥ पूर्वार्द्धं शिलादत्तो गुरो
रुक्तिः ॥ उत्तरार्द्धं च राजकन्यानुरक्तस्य विल्हणस्य जिह्मिलेखः प्रत्युक्तिः ॥ अंगणं तदिदमुन्मदद्विपश्रेणि शोणितविहारि
णो हरेः ॥ उल्लसत्तरुणकेलिपल्लवां सत्र्कि किंत्वडति किंमतंगजः ॥ १७ ॥ पूर्वार्द्धं तच्चित्रपरीक्षिकाया राजकन्याया उक्तिः
उत्तरार्द्धं तदनुरक्तस्य विल्हणस्य प्रत्युक्तिः ॥ इति श्रा० प्रश्नोत्तरेषु अंतरालापबाह्यालापोक्ति प्रत्युक्तिपरिच्छेदः ॥ ॥
अथ जातिः ॥ मेदुलीकृत बर्हाणि कंठैर्मधुरगीतिभिः ॥ कलापिनः प्रनृत्यंति काले जीमूतमालिनि ॥ १ ॥ कलक्वणितगर्भेण कं
ठेनाघूर्णितेक्षणः ॥ पारावतः परावृत्य रिरंसुश्चुंबति प्रियां ॥ २ ॥ दंडिनः ॥ स्थित्वा स्थैर्यादुपांभः सम जठरशिरा चक्रपृष्ठिर्मुद्रा
= यर त्रं भूत्वा सं [illegible] कतीरः कतिचिदपि पदान्युच्चकैः कुंचितांघ्रिः ॥ पश्चाद्ग्रीवां प्रसार्य चरितगतिरपां मध्यमा विश्य [illegible] तीमू
र्द्धकंठः कंपमपि शफरीस्फारिताक्षो बको ॥ ३ ॥ गोविंदराजदेवानां ॥ न्यंचच्चंचलचंचुचुंबनचलत्शूलाग्रमुग्धे पत्त [illegible] चक्राका
= निरर्थ [illegible] नागतं नलिन्यायायानष्टिर्दृष्टीं हिनीं [illegible] ॥ उत्पत्तिर्विदारपिनिः ४ प्रलेपकृष्टा प्रदृष्टानलिनीनयेन ॥ ४ ॥ पूर्वार्द्धं विल्हणस्य उत्तरार्द्धं राजकन्यायाः ॥ ५

स्कराल केसरसटास्फारस्फुरत्कंधरं॥ वारं वारमुदंच्य चंचलघनांत्रश्यामलखद्गुल्मयोर्दृष्ट्राकर्कटयोर्द्वयोः स्थितिरिति क्रूर
कर्मसु ध्यतो॥४॥ वरकच्चेः पक्षानुक्षिप्य धुन्वन्सकलतनुरुहाभोगविस्तारितात्मा प्रागेवोड्डीननिद्रः स्फुरदरुणकरोद्भासितं
स्वं निरीक्ष्य प्रातः पांथायनीडस्थितिचपलतनुर्घर्घरध्वानमुच्चैरुड्डीयं सूर्यकाय्योन्नतविकटसरः कुक्कुटो रारटीति। कस्या
पि। आलोकत्रस्तनारीकृतसभयमहानादधीवज्जनौ युवा प्राप्तद्वारं प्रवेशं प्रचुरकलकलाकर्णनस्तब्धचक्षुः। काष्ठदंडग्रहा
णोत्पतिमुखरजनैस्ताडितो लोष्टघातैर्नीरूः सर्पो गृहस्य नाधिगतविवरः कोणतः कोणमेति। ६ दिविरकिशोरस्य। धूली
धूसरतनवो राज्यस्थितिरत्नकल्पिते कल्पपाः। कृतमुखवाद्यविकाराः क्रीडंति सुनिर्भरं डिंभाः॥७॥ कस्यचिद्गृहस्य। आया
तोत्लवतः पितेति सहसा मातुर्निशम्योदितं धूलीधूसरितो विहाय शिशुभिः क्रीडारसं प्रस्तुतं। दूरान्निर्भरमुखं सयः प्रसा
र्यसलिलं बाहुद्वयं बालको नांधन्यस्य पुरः समेति पुरस्या प्रीत्या रटन्नुर्घर्घरं॥८॥ अष्टर्वारं नोपि प्रतिविंबुकदेशांकरतले
प्रतिज्ञायां कुर्वन्स्तुवति मुहुरशं स्निग्धलरलं। कुमारो हुंकारात्परिषदि समा[illegible]नाम गणयन्नुज्जो वक्तुःपरपन्नृवय ३२
सिकां तिं वितनुते॥९॥ शार्ङ्गधरस्य। खड्गहस्तोरिमालोक्य हर्षामर्षसमन्वितः। भूरः पुलकितोरस्कनेत्रो हसति जृंभते।
१०॥ लक्ष्मीधरस्य। गायति हसति यनृत्यति हृदयेन धृतां प्रियां विचिंतयति। समविषमे वन विंदति गृहगमनसमुत्सुकः
पथिकः॥११॥ मातर्धर्मपरे दयां कुरु मयि श्रांते द्यवैदेशिके द्वारालिंदककोणके सुनिभृतं यास्यामि सुप्त्वा निशि॥ इ

त्युक्ते सहसा प्रचंडगृहिणीवाक्येन निर्भर्त्सितः स्कंधं धूय[illegible]तापज्वालमुष्टि विनवः पांथः पुनः प्रस्थितः॥१२॥ रविदत्तस्य॥ न
द्वंते सदृशां यदध्वगशतैः कीर्तिस्थिरा वोढुमप्यते स्थाने कूपमनुत्तमं सुकृतिना दानेन कर्पोज्झितः। इत्यालोक्य च्छत्रं रौद्रशाक
रुणया श्रीता तुरेण सुतः पांथो नैकपलालमुष्टिकृविना गर्व्यते हालिकः॥१३॥ कस्यापि। विलासमस्तृणो लुसन्मुसलकलो
लदोः कंदलीपरस्पर परिस्खलद्वलयनिस्वनोद्धुराः। लसंतिकलहुंकृति प्रसभकंपितोरस्थलत्रुटद्गमकसंकुलाः कल
मकंडनीगीतयः॥१४॥ विज्ञाकस्याः। अकर्षन्निव गां वमन्निव दिशो पार्श्वार्धमुद्भ्रन्निव स्वीकुर्वन्निव खं पिबन्निव दिशो
वा पूर्वैमुखन्निव स्त्रागारप्रकरीं स्पृशन्निव भुवं छायामसृष्यन्निव प्रेंखच्चामरवीज्यमानवदनः श्रीमान्हयो धावति।
१५॥ सिंहदत्तस्य। पुरो तुन्नः पश्चाद्व्रजति विध्वस्तश्च किततनुः समुत्पत्योत्थानः पतति पथि लोकोत्थ विश्रांतो हयः किं विकृष्टे
ष्य दिनपतिपरीक्षिक मृदहो कशाघाते निष्टत्यथ चरणघातेन खनति॥१६॥ स्थलिसहस्रात् आघ्राया घ्रायगंधं विकटमुख
पटोदर्शयन्दंतपंक्तिं ग्रीवत्युन्मुखे नादो मुकुरपि चरसाक्रष्टया पृष्ठलग्नः। गर्दभ्यापादघाते द्विगुणितसुरतप्रीतिरारूढ शि
श्नो वेगादारुह्य स्कंधेन्नवतरति खरः खंडितेच्छश्चिरेण॥१७॥ मयूरस्य। प्राचा श्रोणीमकुल्या विततमन्निमुखं वक्त्रसंकोचवेगं
स्थित्वा सूर्यं निरीक्ष्य प्रविकसितसरोजह्वयहृत्यहर्मौ स्फुरेण। बुं[illegible]कारान्प्रकुर्वन्मणिसकलनिभं चालयन्नेत्रयुग्मं छागश्चा
हूननेका श्रुरवविरोमन्मयांधः करोति॥१८॥ कस्यापि। पार्श्वास्फालावलेपाच्चडुलितचरणो ह्रेषिताकारादेशः संघट्टा

रोपकोपप्रकटितरसनापल्लवा ८ लीढसृक्काः। किं विस्मारीकृतास्यः स्फुरदधरपुटः स्फारिताताम्रचक्षुर्घोराघातभिलाषा
दपसर निकषं दर्शयन्नेषमेरव॥१९ शाकवर्मणः॥ ग्रीष्मादित्यकरप्रतप्तसिकतामध्योपविष्टः सुखं शेते गौरखरो मरुस्थ
लभुवि प्रोथं निधाय द्वितो। गुंजत्काहकंकटकाहतमरुद्भूतोत्पतद्धूलिभिः छिन्नांगः कलासको पि निस्थितं मार्गं डिमु
द्वीक्ष्यते॥२०॥ मार्गे देहि पदं निधेहि निभृतं तं शब्दमाकर्णय स्थाने वारय कुंदलालकलकलः कोयं सखे तावकः॥ इत्यन्योन्य
मनेकधामृगवधव्यापारपारंगमैर्व्याधैः कोप्यधिको रसः प्रतिपदं जल्पैर्द्विरुत्पाद्यते॥२१॥ घुष्यकोस्य॥ वामस्कंधनिष
णशार्ङ्गजटिलप्रोतार्पिताधोमुखस्पंदच्छोणितलंबमानशशकाञ्चेणीस्यलब्धामराः। ज्यां तत्प्रोतकपोतपोतनिपु
तद्रक्ताक्तनीरकां सोपरस्पल्करिकं भग्नेदजनिताकं दाह्युलिंदा पुरः॥२२ हे मेंद्रस्य गर्जन्हरिः सो न सिंशैलसैन्य कुंजे
प्रत्यध्वनीनाम् मत्तांन्निरम्यापदेबवं धक्रमि सरोषः प्रतर्कयन्नन्यमृगेंद्रनादं॥२३ नष्टस्वामिनः॥ लीढव्यस्तैः स्व विपां ३३
=नाहरि= दुरागृ नखैः यो राकर्ण दीर्णमुखं विन्यस्याग्निमयो युगे चरणयोः सद्यो विनिद्धद्विपः। एतस्मिन्मदगंधवासिततटः स्या
वज्ञा तिर्यग्विलक्षकंधूतलोलमधुपः कुंजेषु शेते हरिः॥२४॥ अंभो मुक्तांसलिलमुद्वमतो निशीथे तालीवनेषु निभृतस्थितकं
र्णताला। आकर्णयन्तिकरिणोर्धनिमीलिताक्षा धारारवान्दशनकोटिनिषण्णहस्ताः॥२५॥ कस्यापि॥ नयनपथनिरो
धकौधानिर्धूतन्मालभ्रमदविरलरोमस्तोमबद्धांधकारः॥ क्रमिकवलनलोलो न्नखातवल्मीकरंध्रोच्छितफणिफणघाते
कंदलस्तुक्कपालेस्यादुपरागिनवांक्रः कलधूनो केदलातुल्लग हृद्धविरोधप्यारितिविश्वः॥

रुच्छलत्येषनक्र॥२६ मदनस्याय दर्कांशुक्रांतः स्फुरदरुणपुष्पोदरधिया प्रविष्टो नासांतः क्वणितमलिडिंभः प्रकुरुते। क
पिः स्थित्वा स्थित्वा तदिदमनुश्वप्य च चकितो धुनोत्यास्यं रौति प्रचलति चलत्युच्छलति च॥२७॥ गर्जद्यामेघधीरं प्रमथश
नेकै डुमैर्लीनत्य देहं शृंगाल्यां लापयन्तावनिमुखमवनिं दारयंतौ खुराग्रैः। मंदं मंदं समेत्य स्थिरनिहितपदं दत्तघातौ
सरोषं युध्येते चालयंतौ कुटिलितमसकृत्पुच्छमेतौ महोक्षौ॥२८॥ कस्यापि॥ आहत्याहत्य मूर्ध्ना द्रुतमनुपिबतः प्रस्नुतं मा
तुरोधः किंचित्कुब्जैककजानोरनवरतचलच्चारुपुच्छस्य धेनुः। उत्तीर्णं तर्णकस्य प्रियतनयतया दत्तहुंकारमुद्रा विस्रसि
क्षीरधारालवशबलमुखस्यांगमापृच्छिलेढि॥२९॥ मयूरस्य॥ इति श्रा० जातिवर्णनपरिच्छेदः॥ ॥अथ सदाचारः॥ श्रोत्रियं सु
नगां मग्निं साग्निं गोधां र्मिकं नदीं। प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥१॥ पापिष्ठं दुर्भगामंत्यं नग्नमुत्कृत्तनासिकं। अपि
घर यं प्रातरुत्थाय पश्यन्कलिमवाप्नुयात्॥२॥ प्रतश्मे विरेके च वांतो च्छुरकर्मणि। दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते॥३
उदक्यापतितं म्लेच्छं चांडालं न्यंजिन्नाषणो। मार्जारमूखकस्पर्शे विण्मूत्रोत्सर्गदर्शनो घ॥ अश्रुचीकूतेऽश्रुपाते कलहे श्वा
=पसर्पणे= सकासयोः। रथ्याप्रदर्शने यांगे क्षुतेनि मुपस्पृशेत्॥५॥ ऊर्ध्वा दावमना भावेनास्करस्यावलोकने। स्पृशेदासाईतृण
गोगोविट्शूद्रहस्तिणष्ठु तीर्थे देवाधिकारिणा छेभावथि कर्मच्छाद्विजानपि। विलोक्योपस्पृशेत्स्पृष्ट्वा सवासाजलमाविश
त्॥७॥ अजाश्वौ मुखतो मेध्यौ गावो मेध्यास्तु पृष्ठतः ब्राह्मणाः पादतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः॥८॥ नास्ति यज्ञः स्त्रि

नेः वसस्प उस्पान्न नः॥
नित्यमास्यं शुचि स्त्रीणां शकुनैः फलपातने। वत्सः प्रस्रवने मेध्यः श्वा मृगग्रहणे शुचिः॥५॥

यः किंचिन्न व्रतं नोपवासकः। या तु भर्तरि शुश्रूषा त[illegible] स्वर्गं जयत्यसौ॥९॥ मृते भर्तरि या नारी ब्रह्मचर्ये व्यवस्थिता। मृता सा
लभते स्वर्गं ~~[illegible]~~ यथा ते ब्रह्मचारिणः॥१०॥ तिस्रः कोट्योर्धकोटी च यानि लोमानि मानुषे॥ तावत्कालं वसेत्स्वर्गे भर्तारं या
नुगच्छति॥११॥ व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। एवं पतिं समुद्धृत्य नारी स्वर्गे प्रमोदते॥१२॥ पृथक् चितां समारुह्य न वि
प्रा गंतुमर्हति। सर्वदेहेन या याति तस्या लोकाः सनातनाः॥१३॥ शुचिर्भूमिगतं तोयं शुचिर्नारी पतिव्रता॥ शुचिः क्षेमकरो राजा
संतोषी ब्राह्मणः शुचिः॥१४॥ गच्छेदेको न पंथानं स्वयं नोपानहो हरेत्। शिरसा न वहेद्भारं न प्रधावेत वर्षति॥१५॥ न स्नानमा
चरेद्भुक्त्वा नातुरो न महानिशि। न वस्त्रैः सह नाजस्रं नाविज्ञाते जलाशये॥१६॥ न धायच्च परिभ्रष्टं पश्चाद्वर्तसमुत्थितं।
गतप्रत्यागतं पश्चात्तत्तोयं परिवर्जयेत्॥१७॥ ब्राह्मणप्रजा गोमहिष्यः सूताः शुध्यन्ति वोदकाः। न द्यः शुद्धा दशाहेन सुरापो
भूमिगा नवाः॥१८॥ प्रवहद्ब्राह्मणं तोयं तडागं क्षत्रियोदकं। वापीकूपगतं वैश्यं शूद्रं चागृहनोदकं॥१९॥ अस्पृश्यात्मा ३४
नेन वीक्षेत नावगाहेत्पयोनिधिं। संदिग्धनावं नारोहेन्न बाहुभ्यां नदीं तरेत्॥२०॥ शीतास्त्वप्सु निषेव्यो स्मामंत्रसेन
रसं स्मृताः। स्नानं गृहेऽपि कुर्वाणः प्राप्नोति स्नानजं फलं॥२१॥ नाग्निं मुखेनोपधमेन्नाधः कुर्यान्न लंघयेत्। नामेध्यं प्र
क्षिपेद्वह्नौ न च पादौ प्रतापयेत्॥२२॥ देवालयं चचत्वरं च नक्तं सेवेत न द्रुमान्॥ शून्यागारं वीथ्यग्रं च हं श्मशानं च दिने घपि॥२३॥
जलं पिबेन्नांजलिना शयानं न प्रबोधयेत्। परान्नं वा वरं तीर्णं धयंतीं च न वारयेत्॥२४॥ शय्यादीपाधमस्तंभ छायां दूरेण संत्य
जेत्।

नर्मालापेन कुर्वीत धीमान्सह हनेः सहा॥२५॥ नोर्ध्वजानुश्चिरं तिष्ठेन्नस्यादुत्कटुकासनः। न नासिकां विकुष्णीयान्न स्वयं कर्तयेत्
न्नखान्॥२६॥ सर्वथा संत्यजेद्दादनं केचिन्मर्मणि स्पृशेत्। सर्वान्परित्यजेदर्थान्स्वाध्यायस्य विरोधिनः॥२७॥ कुर्यात्स्वर्णं सदा धा
र्यं बहिर्माल्यं न धारयेत्। नागं बिभृयात्पुष्पं नात्मार्थं गुंफयेत्स्रजं॥२८॥ नित्यमामलके लक्ष्मीर्नित्यं हस्तिगोमये। नित्यं शं
खे च पद्मे च नित्यं शुक्ले च वाससि॥२९॥ बालार्कप्रेतधूमे च वृद्धा स्त्री पल्वलोदकं। आयुःकामो न सेवेत रात्रौ च दधि नो जनः॥
नो संगे न क्षये लक्ष्मा मौलिं भूमी न संस्पृशेत्। कचिउ छेन्न वो छिष्टः परस्परं ज्योतींषि नाशुचिः॥३१॥ ब्राह्मणो ब्रह्मतीर्थेन
त्रिरद्भिः समुपस्पृशेत्। कुर्यात्स्नानं मनं विष्णुमोंकारं वापि संस्मरेत्॥३२॥ हस्तद्वय स्थिते दर्भैः समा वामतियो द्विजः। सोमपा
नफलं तस्य तु स्नायज्ञफलं लभेत्॥३३॥ गृहेऽपि निवसन्विप्रो मुनिर्मांसविवर्जनात्। मांसादोन्योऽपि मांसस्य त्यागात्स्वर्गं व्र
जेद्ध्रुवं॥३४॥ आत्मार्थं यः पशुं हन्यात्सो वर्षं न रकं व्रजेत्। देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्॥३५॥ अन्नविद्ध्याप
रस्वेषु सर्वसत्त्वेषु सौहृदं। कर्मणो फलमस्तीति मनसा त्रितयं चरेत्॥३६॥ प्राणातिघातं स्तैन्यं च परदाराभिमर्षणं। त्रीणि पा
पानि कायेन नित्यशः परिवर्जयेत्॥३७॥ असत्प्रलापपारुष्यं पैशून्यमनृतं तथा। चत्वारि वाचा राजेंद्र न जल्पेन्न च चिंतयेत्॥३८॥
अहिंसा सत्यवचनं सर्वभूतानुकंपनं। शमो दानं तथा शक्तिर्गार्हस्थो धर्म उच्यते॥३९॥ देवान्पितॄन्मनुष्यांश्च भूतान्यहन्यां श्च देवतां
भोजयित्वा ततः पश्चाद्गृहस्थो भोक्तुमर्हति॥४०॥ [illegible] श्चियामहीं निचाह चा कीटपिपीलिकान्। दद्यान्नं काष्ठुकोऽथ चिंत्यः सर्व

पापैः प्रमुच्यते॥४१॥ राज्ञां दद्यात्तु षड्भागं देवतानां च विंशतिः। त्रिंशद्भागं तु विप्राणां कार्षुको नावसीदति॥४२॥ चक्षुर्दद्यान्मनो दद्या
द्वाचं दद्याच्च सूनृतां। उत्थाय चासनं दद्यादेष धर्मः सनातनः॥४३॥ तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता। सतामेतानि हर्म्येषु
नोच्छिद्यंते कदाचन॥४४॥ ग्रासादर्धमपि ग्रासमर्थिभ्यः किं न यच्छसि। इच्छानुरूपो विभवः कदा कस्य भविष्यति॥४५॥ उष्णका
ले जलं दद्याच्छीतकाले हुताशनं। प्रावृट्काले गृहं दद्यात्सर्वकाले च भोजनं॥४६॥ आर्द्रत्रियामिछिशीकाशनिनुवर्तितशक्तितः। आत्म
वत्सततं पश्येदपि कीटपिपीलिकान्॥४७॥ गोपं का ब्राह्मणीदास्याद्द्वित्रिंलो पाहि द्विजवधात्। मोचयन्मुच्यते जंतुः पापादामरणांति
कान्॥४८॥ न कश्चिदपि जानाति किं कस्य श्वो भविष्यति। अतः श्वःकरणीयानि कुर्यादद्यैव बुद्धिमान्॥४९॥ अनेन सत्यदेहेन पश्चौ
